मायावादनिरासः ।

महामहोपाध्याय-

श्रीयुक्त राखालदास न्यायरत्नभट्टाचार्य्येण

प्रणीतः

तदीयान्तेवासिना

श्रीहरिहर भट्टाचार्य्येण

प्रकाशितः ।

कलिकातानगर्य्यां

८१।२ नं नवविभाकरयन्त्रे श्रीयुक्त गोपालचन्द्र नियोगिना

मुद्रितः ।

१९१२

मूल्यं रूप्यकमेकम्

श्रीदुर्गा शरणम् ।

मायावादनिरासः ।

मातर्ममातितमसाऽऽवृतमाद्यविद्ये
चेतोऽतिकुत्सितचिताञ्चितमीशहृद्ये ।
नाऽन्ये स्पृशन्तु घृणयन्तु सुराः शरण्ये
नोपेक्ष्यमत्र नटनं तव दक्षकन्ये ॥
श्रिया राखालदासेन न्यायरत्नेन धीमता ।
अविद्यासिद्धये भ्रान्तिर्भ्रान्तिमूलैव दर्श्यते ॥

अथ भावनाशं प्रति जन्यभावत्वेन हेतुत्वमिति नैयायिकसिद्धान्तः । स च न सङ्गतः, तथा सति अनाद्यविद्यानाशानुपपत्तिः । इष्टापत्तौ अद्वैतवादिमते अविद्यानाशस्यैव कैवल्यपदार्थत्वात् कैवल्यानुपपत्तिः । कैवल्यानुपगमे घटपटादिरूपालीकाकारतया नित्यबोधस्वरूपब्रह्मण्यनिवृत्तौ महाप्रलयोच्छेदप्रसङ्गः, अलीकाकारतया अविद्यानिर्वाह्यत्वात् । एवञ्च "तमेव विदित्वाऽतिमृत्युमेतौ"त्यादिबहुश्रुतिवाक्यानां निर्विषयत्वमापद्येत । न चाऽविद्या न भावरूपा तस्या भावत्वेनाभावत्वेन वा व्यवहारविषयत्वस्य सन्दिग्धत्वात्, परन्तु तत्पदार्थो मोहत्वरूपाखण्डोपाधिनैव व्यवहारविषयः, मोहत्वं मायात्वमविद्यात्वञ्चैकमेव इति वाच्यम्, सदसद्भ्यामनिर्व्वचनीयमनादिभावरूपं यत्किञ्चिद्वस्तु मोहपदार्थइत्यद्वैतवादिवाक्येनैव पदार्थान्तररूपाविद्याया भावरूपत्वस्य सुस्पष्टप्रतिपादनात् इति चेत् । न, अनाद्यविद्यायां पदार्थान्तररूपतायाः केनाऽपि श्रुत्यनुमानादिरूपप्रमाणेनाऽस्पर्शनात् ।

न च तन्मते घटोऽयं एतद्घटप्रागभावातिरिक्तविनाश्यनादिजन्यः घटत्वात् जन्यत्वात् वा तद्घटातिरिक्तयावज्जन्यवत् इत्यनुमानेन तद्घटे निरुक्तजन्यत्वे साधनीये यन्निरूपितजन्यत्वं सिध्यति तदेवा-विद्यादिनाम्नाऽभिलप्यते। दृष्टान्तवाक्यार्थे तादृशसाध्यसजातीयं च तद्घटप्रागभावातिरिक्ता ये ये प्रागभावास्तज्जन्यत्वरूपं जन्यमात्र एव, यतः स्वस्वप्रागभावजन्यत्वमुभयवादिसिद्धमिति वाच्यम्, जन्य-मात्रस्यैव प्रागभावजन्यत्वस्य क्लृप्तत्वेन प्रागभावभिन्नवस्तुनिरूपिता-नावश्यकजन्यत्वस्याऽलीकत्वात्। न च दर्शितप्रमाणसिद्धं पदार्थमप-लपितुं कः प्रभवतीति वाच्यम्, तथा सति सर्व्वत्रैवाविद्यां साध-यित्वा तद्घटे तदविद्याजन्यत्वातिरिक्ताविद्याजन्यत्वस्यापि साधयितुं शक्यत्वात्। एवंरीत्या सहस्राविद्याजन्यत्वस्यैकव्यक्तावेव सिद्ध्यापत्ते-र्वारणस्य गीर्व्वाणगुरूणामप्यशक्तेः, प्रागभावस्याऽनङ्गीकारे साध्या-प्रसिद्धेश्च।

अपि च तद्घटो निरुक्तजन्यत्वाभावातिरिक्ता ये ये पक्षवृत्ति-धर्म्मास्तदतिरिक्तधर्म्मवान् प्रमेयत्वादित्याकारकानुमानेन दर्शित-जन्यत्वाभावस्याऽपि प्रकृतपक्षे साधयितुं शक्यत्वात्, निरुक्तपक्षधर्म्मा-तिरिक्तत्वस्य दर्शितजन्यत्वाभाव इव पक्षभिन्नमात्रवृत्तियावद्धर्म्मेषु सत्त्वेऽपि पक्षे न तेषां सिद्धिसम्भवो बाधितत्वात् परिशेषेण जन्यत्वा-भावसिद्धावेव पर्य्यवसानात्। तद्घटान्यजन्याभिन्नत्वरूपं प्रतिहेतु-मादायाऽपि सत्प्रतिपक्षसम्भवाच्च। किमधिकं धूमादिरूपप्रसिद्ध-हेतुनापि पर्व्वते सन्दिग्धवह्नेः सिद्धिर्भवितुं नार्हति। वह्न्यभावा-तिरिक्तपर्व्वतवृत्तिधर्म्मातिरिक्तधर्म्मवान् प्रमेयत्वात् इत्याद्यनुमानतो दर्शितरीत्या वह्न्यभावस्याऽपि साधयितुं शक्यत्वात्। एवं पर्व्वता-न्योयो वह्निमान् तदन्यत्वरूपप्रतिहेतुरपि सम्भवति। तस्मात् सहचारमात्रदर्शनजन्यानुमानाद्विवादानास्पदपदार्थसिद्धावपि तर्क-परिशोधितानुमानं विना विवादास्पदीभूतस्य कस्याऽपि वस्तुनो

नाऽनुमानिको सिद्धिर्भवेत्। एवंरीत्या दुष्टमेवाद्वैतवादिनां यावदनुमानम्।

न च सुन्दरोऽहं सुखीत्यादिमिथ्याज्ञाननिर्व्वाहार्थं सर्व्वेषामेव मोहस्वीकारावश्यकत्वमिति वाच्यम्, मिथ्याज्ञानजन्यवासनाधाराया वीजाङ्कुरवदनादित्वेन तत एव दर्शितभ्रमनिर्व्वाहसम्भवात्। तादृश-वासनाधारैव मोहाविद्यापदादिनाऽभिधीयते। सा च तत्त्वज्ञान-नाश्या। अविद्यापदव्युत्पत्तिस्तु विद्याया अर्थात् तत्त्वज्ञानस्य विरोधिनी, अत्र विरोधः स्वोत्तरक्षणेष्वनवस्थानम्, उक्तवासनानाशस्य तत्त्वज्ञानजन्यत्वात्। तत्त्वज्ञानस्य वासनानाशकत्वे प्रमाणमग्रे दर्शयिष्यामः।

न च तादृशवासनाधारायास्तादृशभ्रमजनकत्वकल्पनापेक्षया जीवव्यवहारविषयीभूताविद्यायामेव निरुक्तभ्रमजनकत्वं कल्पयितुं युज्यते। तादृशजनकतयैव तस्याः पदार्थान्तरता सिध्यति प्रागभाव-वत् निखिलजन्यानां जनकतया। एवं च जन्यमात्रस्यैव अविद्या-कार्य्यतया जगतामेव भ्रमाकारत्वमर्थवशसम्पन्नम्, लाघवेन निखिल-जन्यं प्रति अविद्यायाः कारणत्वोपगमात्, अत एवाद्वैतसिद्धौ न विवादलेशोऽपि इति वाच्यम्, अतिरिक्ताविद्यास्वीकर्त्तॄणामपि भ्रम-वैषम्यनिर्व्वाहार्थं मोहविशेषाणां कदाचिच्च रज्जुप्रभृतिषु सर्पत्वादि-भ्रमोत्पादार्थमननुगतदोषविशेषाणां च कारणत्वस्वीकारे पुनरति-रिक्ताविद्यास्वीकारे च युक्तिलेशस्याप्यसत्त्वात्।

न च विशेषकार्य्यानुरोधेन विशेषकारणत्वस्वीकारेऽपि कार्य्य-सामान्यानुत्पत्तिप्रयोजकीभूताभावप्रतियोगितयाऽतिरिक्ताविद्यासिद्धे-रावश्यकत्वम्, सुखदुःखादिरूपविलक्षणकार्य्येषु विजातीयादृष्टानां बहुकारणत्वसत्त्वेऽपि सामान्यतः कार्य्यत्वावच्छिन्नं प्रति अदृष्टत्वेनैक-कारणत्ववदिति वाच्यम्, यद्विशेषयोस्तत् सामान्ययोरिति निय-मेनाविद्यायाः पदार्थान्तररूपतायाः कथमपि सिद्धरसम्भवात्। यतो

दर्शितप्रमाणात् विशेषकारणान्यज्ञानरूपदोषा न हि भवदुक्ता-विद्यारूपदोषान्तर्गताः ।

न चैवमविद्याया अस्वीकारे महाप्रलय एव व्याहन्येत । अस्माकन्तु तत्त्वज्ञानकाशीमरणतः क्रमशो जीवानां यावदविद्यानाशे सति शरीरसागरधराधरधराप्रभृत्याकारतानिवृत्त्या ब्रह्मणः कैवल्यनिर्व्वाहे नितरामिव महाप्रलयस्य प्रामाणिकत्वमिति वाच्यम्, जन्यमात्रं प्रति प्रागभावत्वेन अदृष्टत्वेन च कारणतायाः सर्व्वसम्मतत्वेन यावत्तन्नाशादेव महाप्रलयनिर्व्वाहसम्भवात् तावता यद्विशेषयोस्तत्सामान्ययोरिति नियमोऽपि सुष्ठु सङ्गतः । उक्तनियमे युक्तिविशेषोऽस्ति ग्रन्थगौरवभयेनाऽत्र न प्रदर्शितः सः ।

एकेनाऽपि महावाक्येनाऽनुमानेन चाऽविद्यानां तत्त्वज्ञाननाश्यताया अप्रतिपादिततया तयोर्नाश्यनाशकभावस्य स्वकपोलकल्पनाविषयत्वात् । न च तत्त्वज्ञानाददृष्टनाश इत्यपि महावाक्यतो नाऽवगम्यते इति वाच्यम्, तद्बोधकभूरिप्रमाणवाक्यसत्त्वात् । प्रमाणानि यथा,—

यदा पश्यः पश्यते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पापपुण्ये विधूय
निरञ्जनः परमं साम्यमुपैति ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ॥

इत्यादिकानि बहूनि अद्वैतवादखण्डनग्रन्थे द्रष्टव्यानि । मुक्तिरपि आत्यन्तिकदुःखनिवृत्तिरिति भगवद्गीतमादिसम्मतम् । सैव मुक्तिः परमवाक्यप्रतिपादिता, न त्वविद्यानिवृत्तिर्मुक्तिस्तस्याः केनाऽपि वाक्येनाऽप्रतिपादितत्वात् । वाक्यानि यथा—दुःखेनाऽत्यन्तं विमुक्तश्चरति । अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः । सर्व्वोपनिषत्सारभगवद्गीताऽपि—

इदं ज्ञानमुपाश्रित्य मम साधर्म्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥

काशीमरणादपीदृश्येव मुक्तिर्भवेत्। खण्डनग्रन्थान्तरे एतत्-प्रमाणानि बहूनि प्रदर्शितानि।

भगवद्गीतावाक्ये सादृश्यवाचिसाधर्म्म्यपदस्य पूर्व्वोक्तोपनिषद्-वाक्ये च सादृश्यार्थकसाम्यपदस्य शक्यार्थकत्वानुरोधेन जीवेषु परमात्मनः पारमार्थिकभेदसिद्धौ न कश्चिदपि विवादः। उक्तवाक्यस्थितयोः साधर्म्म्यपदसाम्यपदयोः स्वरूपत्वे लक्षणा इति अद्वैतवादिमतम्। तन्न समीचीनम्, सादृश्यबोधकपदानां स्वरूपत्वलक्षणाज्ञानिष्वासृष्टेः केनापि कदापि शाब्दजनकताया अदृष्टत्वेन तत्र तत्पदवृत्तिताया अपसिद्धान्तकवलितत्वात्। परन्तु सदृशादिपद-प्रयोगासत्त्वेऽपि 'घृतमस्मृतं' 'गौर्वाहिकः' 'पङ्कजं मुखं' 'अयं महात्मा देव' इत्यादावमृतादिपदानां तत्तत्सदृशे लक्षणैवौत्सर्गिकी। 'अयं देवसदृश' इत्युक्तिस्तु स्वरूपलक्षणया कदाचिदपि न देवं बोधयेत्।

अपि च परब्रह्मणि दुःखाभावसत्तायाः सर्व्वैरेवाऽवगतत्वेन तत्त्वज्ञानाज् जीवानां विशुद्धब्रह्मस्वरूपतालाभे तेषु दुःखाभाववत्त्वं निश्चितमेव। एवञ्च दर्शितगीतावाक्यस्थस्य प्रलये न व्यथन्ति चेत्यंशस्याऽद्वैतवादिमतेऽनाकाङ्क्षिताभिधानत्वापत्तिः। अस्मन्मते तु तदंशप्रदर्शनस्य साधर्म्म्यविवरणपरतया सर्व्वज्ञत्वसर्व्वकर्त्तृत्वालाभसूचकतया च सुष्ठुसङ्गतिरेव। अतएव परमं ब्रह्म वेद ब्रह्मैव भवतीतिमुण्डकोपनिषद्वाक्ये ध्येयांशे ब्रह्मपदार्थान्वयिपरपरमपद-प्रयोगः फलांशे बोधपरवाक्यभागे तदप्रयोगश्च साधु सङ्गतः। अन्यथांशद्वय एव तत्पदप्रयोगस्तदप्रयोगो वा समुचितः स्यात्। एतेन जीवब्रह्मपरमब्रह्मणोः पारमार्थिकभेदोऽपि सुस्पष्टमेव सूचितः। तयोरैक्ये परमं ब्रह्म वेद परमं ब्रह्मैव भवतीत्येव प्रयोगस्तिष्ठेत्।

ब्रह्मतत्त्वज्ञानबोधकवाक्यमध्ये "कर्त्तारमीश"मित्यंशस्य सार्थक्याय जगत्कर्त्तृत्वेन ब्रह्मज्ञानमेव मुक्तौ कारणं न तु निष्प्रकारकब्रह्मज्ञानमित्यवधार्य्यताम्।

अथ "तत्त्वमसि श्वेतकेत"वित्यादिश्रुत्या तयोरभेदः स्पष्टमेव प्रतिपादितः। एवञ्च तयोर्भेदे तद्वाक्यस्य बाधितार्थकत्वप्रसङ्ग इति चेन्न, यतस्तत्तद्वाक्यस्य प्रकृततात्पर्य्यावधारणक्षमाणां तद्वाक्यतो जीवब्रह्माभेदशङ्कालेशोऽपि नोदेति किमु तन्निर्णयः। तादृशवाक्यघटितच्छान्दोग्योपनिषद्वाक्यं यथा,—

स य एषोऽणिमा ऐतदात्म्यमिदं सर्व्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति।

अत्र स आत्मेति पुंलिङ्गात्मपदसाकाङ्क्ष स इति सर्व्वनामतत्पदस्य पुंलिङ्गतावत् तत्त्वमसीत्यत्र तत्पदस्यापि पुंलिङ्गत्वमेव युक्तम्; अतः स इत्येव तिष्ठेत् तदपहाय तदितिप्रयोगः कथमपि न हि सम्भवेत्। कथं वा स इति प्रयोगः परित्यक्तः? अतस्तत्पदं पुंलिङ्गमेव। परन्तु अश्वतीत्यादिवत् कर्त्तृविहितक्विवन्तविप्प्रत्ययनिष्पादितं सर्व्वनाम। एवं च हे श्वेतकेतो पूर्व्वप्रदर्शितजगत्कर्त्तृत्वादिना ब्रह्मज्ञानजयोगबलात् ब्रह्माचारतुल्याचारवान् भवेत्युपदेशे श्वेतकेतुं प्रति स्वपितुर्महर्षेस्तद्वाक्यतात्पर्य्यम्। ब्रह्मगताचारस्तु अविशेषेण सर्व्वजीवहितकारित्वादिकम्। प्रमाणन्तु—

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥

इत्यादिकम्। तत्र लट्प्रत्ययो विध्यर्थकः। अतस्तत्राऽसीतिप्रयोगोऽर्थवान् भवति। तद्वाक्यस्य पदार्थनिर्णयमात्रतात्पर्य्यकत्वे असिपदभागस्य निष्प्रयोजनकत्वं स्यात्। अतएव स आत्मेत्यन्तानां पदार्थनिर्व्वचनपराणां मध्ये तिङन्तप्रयोगो न कृतः अपि च तद्वाक्यस्य पदार्थनिर्व्वचनपरत्वे तत् सर्व्वजीव इत्यनुक्त्वा एकजीवतात्-

पर्य्यकतत्त्वमसीत्युक्तिर्न स्यात्। तत्र स आत्मे त्यन्तवाक्यानां निष्कर्षस्तु—अणिमा परमाणुः, भावप्रत्ययार्थो न विवक्षितः। ऐतदात्म्यमिदं सर्व्वमित्यत्र एतच्छब्देनाव्यवहितप्रागभिहिताणुरेव प्रतिपादितः। न त्वतिव्यवहितसच्छब्दप्रतिपाद्यं ब्रह्म। समुदितार्थस्तु आदिमद्द्व्यणुकादिकं सर्व्वं परमाणुजन्यं आत्मजन्यञ्च*। 'तत्' तस्मात् तदुभयजन्यं सर्व्वमपि सत्यम्। एतेन ब्रह्मण एव सत्यत्वमित्यद्वैतवादो निराकृतः। उक्तोपनिषत्स्थितवाक्यान्तरेणापि ब्रह्मैव सत्यं जगन्मिथ्येति प्रलापो निरस्तः। वाक्यानि यथा—"त्रीणि रूपाणीत्येव सत्यम्" "मृत्तिकेत्येव सत्यम्" "लोहमित्येव सत्यम्" "कार्ष्णायसमित्येव सत्यम्" इत्यादि।

ब्रह्मण इव जलादिपरमाणूनां गगनस्य महाकालस्य चाऽपि नित्यत्वं महाभारतीयशान्तिपर्व्ववचनेन सुव्यक्तमेव प्रतिपादितम्। परमाणुसमवेतभूतानां महत्त्वं जन्यत्वं च। तद्यथा—

"विद्धि नारद पञ्चैतान् शाश्वतानचलान् ध्रुवान्।
महतस्तेजसो राशीन् कालषष्ठान् स्वभावतः॥
आपश्चैवान्तरीक्षं च पृथिवी वायुपावकौ॥"

वचनभावार्थस्तु कालः षष्ठो येषामेतान् पञ्च अर्थात् कालसहितपञ्चभूतानीति यावत्, शाश्वतान् नित्यान्, अचलान् प्रत्यक्षयोग्यक्रियारहितान्, ध्रुवान् नित्यान्। शाश्वतपदध्रुवपदयोर्नित्यत्वविशिष्टवाचकत्वमत्र कोषः—

"शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः" ॥

नित्यत्वबोधकपदद्वयोत्कीर्त्तनन्तु एषां नित्यत्वनिश्चयस्य दार्ढ्यार्थमेव। तुर्य्याद्यात्मकचतुर्विधभूतानि महत्त्वरूपपरिमाण-

---

* विदिभिदिच्छिदेः कुरचिति सूत्रस्य विदिभिदिसहितच्छिदिरिति (शब्दशक्तिप्रकाशिकायां) जगदीशप्रदर्शितविग्रहवत् यण्प्रकृतेरेतदात्मेत्यंस्यैतत् सहित आत्मेति विग्रहोऽनुसन्धेयः।

वन्तीत्यपि विद्धि इत्याह महतस्तेजसो राशीनिति, तेजस इत्युपलक्षणम्, अपां पवनस्य पृथिव्याश्च राशीन्महतो विद्धि। अत्र राशिपदं मञ्चाः क्रोशन्तीतिवाक्यस्थितमञ्चस्यपुरुषलाक्षणिकमञ्चपदवद्राशिस्थितद्रव्येषु लाक्षणिकम्। एतेन तेजःप्रभृतिचतुर्व्विधभूतसमवेतानि द्रव्याणि सजातीयराशिकार्य्याणि लभ्यन्ते। वाय्वादिषु तेषु महत्त्वं कुतो निर्णीयत इत्याशङ्कायामाह स्वभावत इति, अयभ्भावः, स्वस्य राशिसमवेतस्य भावतः उत्पत्तितः। एतावता जन्यद्रव्यत्वमेव महत्त्वानुमापकमित्येवायातम्। इदमत्रावधेयम् द्व्यणुकानां कार्य्यान्तरत्वे मानाभावः परमाणुत्रयस्य तच्चतुष्टयस्य तत्पञ्चककमात्रस्य वा संयोगतः कार्य्यान्तरताया अप्रामाणिकत्ववत्। त्रुटिस्तु परमाणुषट्कसंयोगेभ्यः प्रथमत एव जायते नतु द्व्यणुकरूपकार्य्यान्तरमन्तराकृत्य अनावश्यकत्वात्। अथ राशिपदे राशिस्थलाक्षणिकत्वं यथा भवतोपगम्यते तथाऽस्माभिरपि शाश्वतादिपदस्य शाश्वतजन्ये लक्षणामुपगम्य एकमात्रनित्यब्रह्मजन्यत्वं परमाणुगगनादौ स्वीकरणीयमिति चेन्न, भवन्मते शाश्वतपदस्य ध्रुवपदस्य च द्वयोरेव लाक्षणिकत्वापत्तिभयेन एकमात्रराशिपदस्यैव लाक्षणिकत्वौचित्यात्। एवं महाकालस्याऽपि ब्रह्मजन्यत्वापत्तेः इष्टापत्तौ "कालस्वरूपं रूपं तद्विष्णोर्मैत्रेय वर्त्तते।" "अनादिनिधनः कालः स च कालः सनातन" इत्यादिबहुपरमवाक्यविरोधो दुष्परिहरः स्यात्। एवं नैयायिकमते परमाणूनां गगनस्य च ध्वंसप्रागभावाकल्पनकृतं लाघवं च। पञ्चानां विवरणमाह आपश्चैवान्तरीक्षञ्चेत्यादि। उक्तवचनेन आकाशवत् सर्व्वगतश्च नित्य इति वाक्यस्य आकाशं दृष्टान्तीकृत्य दार्ष्टान्ते भगवति सर्व्वगतत्वनिबन्धननित्यत्वसाधनार्थं प्रयुक्तत्वेन यथा सर्व्वगमाकाशमितिभगवद्गीतावाक्येन चाऽऽकाशस्य नित्यताया गुरुणाऽपि निराकर्त्तुमशक्यत्वात्। अतएव यतो वा इमानि भूतानि जायन्ते इत्युपनिषद्वाक्यमपि सुष्ठु सङ्गतम्।

अन्यथा गगनपरमाणुरूपभूतविशेषव्यावर्त्तकतात्पर्य्यकमिमानीति पदं व्यर्थं स्यात्, तयोरप्यनित्यत्वे भूतानीतिप्रयोगेणैव सामञ्जस्य-सम्भवात्। एतेन ब्रह्मैव पारमार्थिकं सत् नित्यत्वान्नत्वन्यत् किमपीत्यद्वैतवादिमतमसमञ्जसमेव। उक्तविविधवस्तूनां नित्यत्वसाधक-प्रमाणसाम्राज्यसत्त्वात्। तत्साधकान्यनुमानानि च निपुणतरैरेवोद्भावयितुं शक्यानि न त्वद्वैतवादिना केनाऽपि।

अथैवमाकाशस्य नित्यत्वे आकाशः सम्भूत इत्यादिश्रुतिवाक्यानां का गतिरिति चेन्न उक्तमहाभारतीयवाक्यस्य वेदवाक्यस्य च द्वयोरुपपत्त्यर्थं उक्तजननबोधकश्रुतिवाक्यस्याकाशपदबोध्यतावच्छेदक-शब्दांशे जननान्वयबोधतात्पर्य्यकत्वमुपगम्य सङ्गमनीयत्वात्। न च पदार्थः पदार्थान्तरेणैवान्वेति न तु पदार्थैकदेश इति वाच्यम्, शिखी-विनष्टः पुरुषो न नष्टः, महाकविर्महाविज्ञ इत्यादौ घटेतरो घट-शून्य इत्यादिस्थले च तत्तत्पदबोध्यैः शिखाविज्ञत्वकवित्वभेदात्यन्ता-भावरूपैस्तत्तत्पदबोध्यैरेकदेशैः सह नाशाद्यन्वयबोधस्यौत्सर्गिकत्व-दृष्ट्याऽऽकाशपदबोध्येन तदेकदेशेन सममन्वयबोधस्य समीचीनत्वात्। यत्र हि स्वरूपतः पदार्थैकदेश उपस्थितस्तेन समं पदान्तरार्थस्य स्वातन्त्र्येणान्वयो न भवेदितिनियमात्॥

परमाणूनां पारमार्थिकत्वं यावज्जन्यमहत्त्वाश्रयाणां साक्षात्-परम्परया परमाणुमूलकत्वं तेषु चावयवसमवेतत्वेन तद्भिन्नत्वं सुतरा-मेवावयविष्ववयवविषमपरिमाणवत्त्वमिति सुस्पष्टमेवाऽवगम्यते ब्रह्म-सूत्रैः। यथा—महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामिति समवाया-भ्युपगमाच्चेति, साम्यादनवस्थितेरिति च।

अस्य भावार्थः—'परिमण्डलात्' परमाणुद्वयात् दीर्घरूपपरि-माणविशिष्टं द्व्यणुकं ह्रस्वात् त्र्यणुकादिरूपान्यतमावयवात् यथा-सम्भवं महद्दीर्घनामकपरिमाणेन विशिष्टं जायत इति शेषः। दीर्घत्वञ्च महत्त्वव्याप्यजातिरेव। सूत्रस्थवदिति मतुप्प्रत्यय-

निष्पादितं ननु सहस्रवाचिवत्प्रत्ययो दार्ष्टान्तवाक्यासत्त्वात्। शुक्लादिपदस्येव महद्दीर्घादिपदस्य गुणगुणिबोधकत्वं सर्वसम्मतमेव। अतएव "कालखात्मदिशां सर्व्वगतत्वं परमं महत्।" इति महा-महोपाध्यायभाषापरिच्छेदतद्वृत्तिकृद्विश्वनाथेनोक्तम्। अथवा महत्-पदस्य दीर्घपदस्य च सूत्रस्थितत्वेन विशेष्यविधया महत्त्वादिबोधकत्वं नाव्युत्पन्नम्। अतएव "कर्म्मणि द्वितीया" "कर्त्तृकरणयोस्तृतीया" सम्प्रदाने चतुर्थी" "अपादाने पञ्चमी" "अधिकरणे सप्तमी"ति सूत्र-स्थितानि कर्म्मादिपदानि कर्म्मत्वादिरूपभावपरतया नैयायिकै-र्व्याख्यातानि।

दर्शितप्रमाणेन परमाणुष्वेवोपादानत्वस्य सुस्पष्टमभिहिततया तेष्वेव कार्य्यद्रव्याणां चरमध्वंसः सूचितः। अयमाशयः—क्रमशो यदुपादानं यद्भवति विलोमेन तस्मिन्नेव तस्य लय इति नियमः। गीतावाक्यमप्येवमेवाह—"एतद्योनीनि भूतानि—" इति "— प्रकृतिं यान्ति मामिकाम्।" इति च। 'प्रकृतिं' भूम्याद्यात्मक-परमाणुम्। छान्दोग्योपनिषदपि—"तेजः परस्यां देवतायाम्। "स य एषोऽणिमा"। ऐतदात्म्यमिदं सर्व्वम्" इति। एतेन जगतां ब्रह्मणि लय इत्यद्वैतवादिमतं निरस्तम्, उक्तवचनेन परमाणुष्वेव लयोपादानत्वयोः प्रतिपादनात्। ब्रह्मणि तेषां लये 'मा'मित्यनुक्त्वा मामिकां प्रकृतिमित्युक्तिर्न स्यात्, स्याच्च स य एषोऽणिमेत्यंशप्रदर्शन-वैफल्यम्। विद्यारण्यमुनेरपि त्रसरेण्वादौ परमाण्वादिजन्यत्वे विवादो नासीत्।

तार्किकैरिव ब्रह्मसूत्रकृता वेदव्यासेनाऽपि समवायरूपसम्बन्धः स्वीकृतः। यथा तत्प्रणीतसूत्रम्—"समवायाभ्युपगमाच्च साम्या-दनवस्थितेः।" *

---

* अस्य व्याख्यानमद्वैतवादखण्डनग्रन्थे द्रष्टव्यम्।

भूतचतुष्टयस्य भगवज्जन्यत्वे सजातीयपरमाणुजन्यत्वे च भगवद्गीताऽपि प्रमाणम् । तद् यथा—

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।

अस्य भावार्थः—प्रकृतिः परमाणुसन्ततिः जन्यभूतानि सूयते अर्थादुपादानीभूय सृजति, जड़ात्मकेषूपादानत्वं कर्त्तारं विनाऽनुपपन्नमित्याशङ्कानिवृत्तये मयाऽध्यक्षेण इत्युक्तम् । अस्य भावार्थः—उपादानप्रत्यक्षवता मया कर्त्त्रा सह मां सहायीकृत्येति यावत् । अत्र प्रकृतिशब्देन शक्त्या परिभाषया वा भूम्याद्यात्मकचतुर्व्विधपरमाणवो बोध्यास्तेषामुपक्रान्तत्वात् । यथा—भूमिरापोऽनलो वायुरित्यादिप्रकृतिं विद्धि मे परामित्यन्तं भगवद्वाक्यम् । जन्यभूतानां साक्षात्परम्परया परमाण्वात्मकप्रकृतिरूपभूतप्रयुक्तत्वं भगवता सुस्पष्टमेवाऽभिहितम् । तद् यथा—

एतद्योनीनि भूतानि सर्व्वाणीत्युपधारय ।

अस्य भावार्थः—एतद्योनीनि सर्व्वाणि भूतानि अर्थात् भूम्यादिरूपप्रकृतिसदृशानि । सादृश्यं तु विशेषगुणवत्त्वेन । भूतपदस्य सादृश्यवाचित्वे कोषो यथा—

युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु ।

एतद्विचारविस्तारः "अद्वैतवादखण्डनग्रन्थे" मत्पुत्रहरकुमारशास्त्रिप्रणीत "काशीवास"नामकग्रन्थे च द्रष्टव्यः ।

लोकव्यवहारेण लौकिकवैदिककोषादिरूपेण वा प्रमाणेनासिद्धार्थानादाय "भूमिराप" इत्यादि "सूयते सचराचर"मित्यन्तभगवद्वाक्यव्याख्यातॄणामद्वैतवादिनां जयतु स्वप्नलब्धः पदार्थः ।

"ऐतदात्म्यमिदं सर्व्वं"मित्यत्रात्मपदं किं जीवात्मपरं उत परमात्मपरमित्याशङ्कायामाह—"स आत्मे"ति । अत्र तत्पदमितिपूर्व्वोक्त—सदेव सौम्येदमग्र आसीदित्याद्येकमेवाद्वितीयमित्यन्तवाक्यघटकसत्पदप्रतिपादितपरमात्मपरम् । "ऐतदात्म्यमिदं सर्व्वं"मिति

वाक्यस्य केवलब्रह्मजन्यत्वबोधकत्वे ऐतदितिपदस्य वैयर्थ्यं स आत्मेत्यंशस्य वा, दर्शितभगवद्गीताविरोधश्च। जगतां परमाणुजन्यत्वमुपनिषदन्तरमपि प्रमापयति। तद् यथा—"असद्वा इदमग्र आसीत् ततो वै सदजायत—" अत्र वाकारो व्यवस्थितविकल्पःपरः। अस्य भावार्थः—'सत्' ब्रह्म तत्सदृशः अर्थात् परमाणुस्तोमः, नञः सादृश्यबोधकत्वात्। सादृश्यन्तु नित्यभावत्वादिना। परमाणूनां नानात्वेन "सदेव सौम्येदमग्र आसीत् एकमेवाद्वितीयम्" इत्यादिवाक्य इवात्राद्वितीयपदप्रयोगो नास्ति। अथ वा भेदवाचिनञ्तत्पुरुषसमासनिष्पादितोऽसच्छब्दः। सर्व्वजनप्रमाणीकृत "शब्दकल्पद्रुमे" असत्पदस्य उक्त एवार्थो दृश्यते। यथा—"असद् ब्रह्मभिन्नं वस्तु इति वेदान्तः" इति। परिमाणात् परिमाणं जायते इत्यादिवाक्यात् परमाण्वादिपरिमाणभिन्नपरिमाणजन्यत्वमिव ब्रह्मभिन्नात् सदजायतेति वाक्येऽपि सामानाधिकरण्यान्वयमहिम्ना परमाणुजन्यत्वं को हि दूरदर्शी अवधारयति। "ततो वै सदजायत" इत्यर्थस्तु—परमाणुभ्यः 'सत्' पारमार्थिकं वस्तु अजायत। साक्षात्परम्परया प्रमाविषयाः सर्व्वाण्येव जन्यभूतानि परमाणुप्रयुक्तानीति फलितम्, "एतद्योनीनि भूतानी"तिभगवदुक्तेः। अतएव सत्पदप्रयोगोऽपि सार्थको भवति। एतेन जगतां मिथ्यात्ववादो निराकृतः।

यत्तु "असद्वे—"ति सूत्रस्थासत्पदं नामरूपाभ्यामव्याकृतब्रह्मपरम्, अतः सत्पदस्येवासत्पदस्यापि विशुद्धब्रह्मबोधसामर्थ्यमपलपितुं कोऽपि न प्रभवति। एतावता सर्व्व एवानुभवन्त्वद्वैतवादिनः कस्मादपि पराजयं न भजन्ते—ये तु प्रतिभाशालिबुद्धिबलेन सच्छब्दस्य ब्रह्मप्रतिपादकत्वमसच्छब्दस्यापि ब्रह्मप्रतिपादकत्वं बोधयितुं प्रभवन्ति प्रायशः सर्व्वेषां नयनेषु धूलिमुष्टिप्रक्षेपणन्यायेन। तेषां चेष्टितमतीव हास्यास्पदम्। यतोऽसत्पदं नञ् तत्पुरुषसमासनिष्पा-

दितम्; तत्समासस्य योगलभ्यार्थस्तु ब्रह्मभिन्नं ब्रह्मसदृशं वा। अतस्तत्पदं कथमप्यद्वैतवाद्युक्तमर्थं प्रतिपादयितुं न प्रभवति। न चाऽसत्पदं तदर्थे रूढ़मेवेति वाच्यम्, समासनिष्पन्नयावत्पदानामिव केवलरूढ़त्वस्यापसिद्धान्ततायाः सकलव्युत्पन्नसम्मतत्वात्। यौगिक-भिन्नं समासनिष्पादितपदं नाऽस्तीति जगदीशप्रणीतशब्दशक्तिप्रका-शिकाग्रन्थादवगतम्।

अथात्रासत्पदं घटपटादिशब्दवत् तदर्थकनामेव न तु समस्त-मिति चेन्न तथा सति तन्नाम्नः सूत्रानिष्पाद्यत्वेनासाधुतापातात्, अद्वैतवादिनिर्द्धारितार्थे शक्तिग्राहकस्य कोषाद्यन्यतमरूपस्य कस्या-प्युपायस्याऽदृष्टचरत्वाच्च। अथ यज्ञदत्तप्रभृतिनामवदसदिति शङ्करा-चार्य्यसङ्केतिततदर्थकनामेव अतस्तत्पदं पारिभाषिकमिति चेत् शङ्कराचार्य्यच्छात्रपरम्परया तत्पदात् तदर्थोऽवधार्य्यताम्, वयं तु शङ्कराचार्य्याविर्भावपूर्व्वकाले सत्ययुगादौ सकलमहर्षिभिरसच्छब्दस्य व्युत्पत्तिलभ्यो योऽर्थो निश्चितस्तमनुसृत्यैवाऽसच्छब्दव्याख्यां प्रका-शयितुं यतामहे। अथाऽसत्पदेन लक्षणयैव तादृशार्थः प्रतिपाद्यता-मिति चेदद्वैतवादिनां धनुर्भङ्गपणश्चिरं जीवतु।

वस्तुतस्तु ब्रह्मणो निखिलजन्यानां च परस्परपारमार्थिकपार्थ-क्यस्य श्रुतिसूत्रादितोऽवधारितत्वेन तस्य नामरूपाभ्यामव्याकृतेः सदातनतया "पिष्टपेषण" न्यायं किं नानुधावति नामरूपाभ्यामव्या-कृतत्वापन्नब्रह्मबोधकं वाक्यम्? ब्रह्मण्यव्याकृतत्वरूपविशेषणस्या-व्यावर्त्तकत्वात्। ब्रह्मणि तादृशविशेषणं तदेव व्यावर्त्तकं सम्भवेद् यदि कदाचिदपि तत्र नामरूपाभ्यां व्याकृतत्वं तिष्ठेत्।

"सदेव सौम्येदमग्र आसीदिति प्रागुक्तोपनिषद्वाक्यस्थित-सदे-वेत्येवकारःशून्यवादिमतनिरासकः, न तु पदार्थान्तरनिरासकोऽपि। छान्दोग्योपनिषद्वाक्यतस्तथैव सुस्पष्टावगमात्। वाक्यं यथा,— "असदेव सौम्येदमग्र आसीत् एकमेवाद्वितीयम्। कुतस्तु खलु

सौम्येदं स्यादिति होवाच कथमसतः सज्जायेतेति सत्त्वेव सौम्येदमग्र आसीत् एकमेवाद्वितीय"मिति। सदेवेत्याद्येकमेवाद्वितीयमित्यन्तस्य संक्षेपतो निष्कर्षस्तु—"आत्मा वेदमेकएवाग्र आसीत् नान्यत् किञ्चन मिषत्। स ऐक्षत लोकान् नु सृजे"तिश्रुतिस्थमिषत्पदं प्रत्यक्षवदर्थकम्*। 'मिषत्' व्यापारवदिति शङ्कराचार्य्यव्याख्या। ईदृशश्रुत्या सममेकवाक्यताया आवश्यकत्वेन दर्शितश्रुतिस्थैकमेवाद्वितीयमित्यंशस्य सृष्टिप्राक्काले प्रत्यक्षविशिष्टमेकमेवासीत्, तदानीं तद्विशिष्टमपरं किमपि नासीदित्यर्थं एव; अन्यथा मिषत्पदं व्यर्थं स्यात्। सदेव "सौम्येद—" मित्यादिश्रुते र्व्याख्याविस्तारः अद्वैतवादखण्डनग्रन्थे द्रष्टव्यः।

अथ जन्यभूतानां परमाणूपादानकत्वे कथं सकलजन्ये ब्रह्मात्मकतानिर्व्वाह इति चेन्न तेषां ब्रह्मस्वरूपत्वबोधकप्रमाणलेशस्याऽप्यदृष्टत्वात्। न च "सर्व्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते"-त्युपनिषद्वाक्येन "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते। वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः॥" इति भगवद्गीतावाक्येन च सर्व्वेषां ब्रह्मात्मकत्वं सुस्पष्टमेव प्रतिपाद्यते इति वाच्यम्, यतस्तद्वाक्यद्वयाद् वस्तूनां ब्रह्मात्मकत्वं न ह्यवगम्यते, परन्तु उपासीतेत्यत्रोपासनात्मकज्ञानरूपार्थः प्रत्याय्यते, गीतायां तु ज्ञानशब्द एवास्ति ज्ञानार्थकपदोपसन्दानमहिम्ना च सर्व्वविशेष्यकमभेदसम्बन्धाच्छिन्नब्रह्मप्रकारकं तत्सम्बन्धावच्छिन्नवासुदेवप्रकारकञ्च ज्ञानमेव दर्शितवाक्यद्वयं प्रतिपादयति, न तु सर्व्ववस्तुषु तदभेदमपि। शुक्तौ रजतं रज्जुः सर्पः शङ्खः पीतो ज्ञायते इत्यादिवाक्यतस्तदभेदभ्रमवत्। "व्याप्तिपक्षधर्म्मतावगाहिज्ञानजन्यज्ञानमिति-

* 'मिषत्'पदस्य प्रत्यक्षवदर्थकत्वे प्रमाणं यथा—

"अद्य राधासुतस्याहं संग्रामे मधुसूदन।
शिरश्छेत्स्यामि कर्णस्य मिषतां सर्व्वधन्विनाम्॥"

महाभारतम् भीष्मपर्व्व ७४। ३३।

लक्षणवाक्यघटकज्ञानपदोपसन्दानात् तद्वाक्यतो भ्रमात्मकपरामर्शस्यापि लाभ" इत्यनुमितिग्रन्थे दीधितिकारेणाऽपि स्वहस्तितम्। अतएव बाधितार्थकत्वेऽपि "विष्णुं जामातरं मन्ये" "मत्समः पातकी नाऽस्ति त्वत्समो नाऽस्ति पापहे"त्यादिवाक्यान्यपि सूपपद्यन्ते। न च तादृशाकारकब्रह्मज्ञानस्य वाक्यतो भ्रमात्मकज्ञानस्येव प्रमात्मकज्ञानस्याऽपि लाभसम्भवः। एवञ्च प्रमात्मकज्ञानपरतया परमवाक्योपपत्तौ तज्ज्ञाने भ्रमत्वोपवर्णनमयुक्तमिति वाच्यं तज्ज्ञाने प्रमात्वस्य ब्रह्मसूत्रोपदर्शिततर्कबाधितत्वात्। सूत्रं यथा— "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा।" सूत्रभावार्थः—कृत्स्नानां उपादेयगतापाकजविशेषगुणानां प्रसक्तिः आपत्तिः ब्रह्मणीति शेषः निरवयवत्वशब्दव्याकोपो वा इत्यंशस्यार्थस्तु—'निरवयत्वशब्दस्य' 'निरवयत्वव्यवहारस्य' व्याकोपः आपत्तिः अवयविनोति शेषः।

सूत्रबोध्यतर्कद्वयाकारस्तु ब्रह्म यदि द्रव्यसमवायिकारणं स्यात् तदा समवेतद्रव्यगतापाकजनिखिलविशेषगुणसजातीयनिखिलगुणवत् स्यात्; यथा घटपटादिगततादृशगुणवत् कपालादिकम्। द्वितीयस्तर्कस्तु घटादिरूपावयविनो यदि एकमात्रब्रह्मोपादानका भवेयुस्तदा निरवयवशब्देन व्यवह्रियेरन्। द्वयावृत्तिजन्ययावद्गुणवत्। ननु "सर्व्वं खल्विदं ब्रह्मे"त्यादिश्रुतिवाक्यतो ब्रह्मणो निखिलजन्यानाञ्चाभेदावगमेन दर्शितनिखिलगुणवत्त्वं ब्रह्मणोष्टमेवातः स तर्काभासः वेदविरुद्धत्वात्। अतएव महर्षिवाक्यम्—

आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणाभिसन्धत्ते स धर्म्मं वेद नेतरः॥ इति।

एतद्वाक्येनेत्येव प्रतिपादितं वेदार्थसन्देहे तदेकतरनिश्चायकः कोऽप्युपायो नाऽस्ति विना तर्कम्। प्रकृते तत्सन्देह एव नास्ति। ब्रह्मणि गन्धो नास्ति रसो नास्तीत्यादिलोकव्यवहारात्मकशब्दस्तु श्रुतिविरुद्धार्थकत्वेनाप्रमाणमेव इत्यत आह—"श्रुतेस्तु शब्दमूल-

त्वात्” इति सूत्रान्तरम्। अस्यार्थः—निरुक्तालोकव्यवहारात्मक-शब्दमूलीभूतश्रुतिसत्त्वात्। सा यथा—

अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत्। इत्यादि।

“सर्व्वं खल्विदं ब्रह्मेत्यादिवाक्यस्य ब्रह्माभेदपरताया विविधयुक्त्या निरसनीयत्वात्। एतद्विचारविस्तारः सर्व्वस्मिन् ब्रह्माभेदज्ञाने भ्रमत्वसंस्थापकविचारश्च “अद्वैतवादखण्डन” ग्रन्थे द्रष्टव्यः।

सजातीयानां निखिलजन्यभूतानां साक्षात् परम्परया वार-म्भकत्वं परमाणुसन्ततेरेवेति सुस्पष्टं प्रतिपादयति उपनिषद्वाक्य-मपि। तद् यथा—

अजामेकां लोहितशुक्लकृष्णां
बह्वीं प्रजां सृजमानां स्वरूपाम्।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः॥

श्रुतिभावार्थस्तु—अजेतिपदत्रयसत्त्वेन नित्यानां—त्रैविध्य-लाभः। एकेतिपदद्वयस्य भेदवद्वाचित्वम्; एतेन अजानां अजस्य च परस्परं भेदो लभ्यते इति तु तार्किक द्वैतवादिनोः समानम्। साङ्ख्यमते तु एकामितिपदं सङ्ख्यावाचकम्, तन्मते अजापदप्रति-प्राद्यमूलप्रकृतेरेकत्वात्। द्वितीयाजपदसाकाङ्क्षैकपदं भेदवत्तात्-पर्य्यकम्, प्रकृतिसेविनां पुरुषाणामसङ्ख्यत्वेनैकत्वरूपसङ्ख्याया बाधित-त्वात्। तार्किकाद्वैतवादिमते पुनर्द्वितीयैकपदस्य सङ्ख्यातात्पर्य्य-कत्वमपि सम्भवति सृष्टिकर्त्तुरेकत्वात्। एकपदस्य भेदवद्वाचित्वे कोषो यथा—एके मुख्यान्यकेवलाः इति। श्रुतिवाक्ये अनुत्पन्नत्व-प्रतिपादकाजेतिपदत्रयेण फलतः परमाणुसन्ततिरूपाजा-जगत्-कर्त्तृरूपाज-जीवात्मरूपाजानामविनाशित्वमपि सूचितम्, भावनाशं प्रति जन्यभावत्वेन हेतुतयाऽनुत्पन्नभावानां नाशासम्भवात्। एते-

नाद्वैतवादिनामजापदप्रतिपाद्याविद्या सा चानुत्पन्नापि विनाश-प्रतियोगिनीति व्यवस्था निरस्ता। दर्शितयुक्त्या तासां नाशासम्भवात्। अविद्यारूपपदार्थान्तराणां तेजोजलभूम्यन्यतमानात्मकतया रूपवत्त्वाभावेन लोहितशुक्लकृष्णामित्यंशबोधितगुणानां तासु बाधापत्तेश्च। यतस्तेजःप्रभृतित्रिविधद्रव्येष्वेव रूपवत्त्वं सर्व्वजनव्यवहारसिद्धम्। एवमविद्यासु रूपवत्त्वस्वीकारोऽनावश्यकः, अत्र तत्प्रदर्शनमप्यनावश्यकम्। न हि भ्रमात्मकं ज्ञानं स्वविषयगतगुणसजातीयगुणवन्तं दोषमुपजीवति। तार्किकमते साङ्ख्यमते च परमाणूपादेयकार्य्यगतानां प्रकृतिरूपोपादानस्य कार्य्यगतानाञ्च विशेषगुणानामुपादानीयतादृशगुणजन्यत्वस्य सर्व्वसम्मतत्वेन उपादानगत तादृशगुणवत्त्वस्वीकारस्य तत्प्रदर्शनस्य चावश्यकत्वम्। नचाविद्या उपादानविधयैव जगत्कारणानि स्वीक्रियन्ते इति वाच्यं तथा सति तन्मते जगतां ब्रह्मात्मकत्वसिद्धान्तव्याघातापत्तेः।

अथ स्वच्छब्रह्मण्यविद्याप्रतिविम्बमेव दृश्यते एवञ्चाविद्यासु नानाविधरूपासत्त्वे विविधरूपैर्घटपटादिदर्शनं न स्यात्, अतोऽविद्यास्वपि नानारूपस्वीकारावश्यकत्वं, मायिकं जगदिति वाक्यस्य च तादृशप्रतिविम्बतात्पर्य्यकत्वमेव इति चेन्नाविद्यायां रूपवत्त्वस्येव रसस्पर्शादिस्वीकारेऽपि तत्प्रतिविम्बेषु रासनस्पार्शनादेः कथमपि निर्व्वाहासम्भवात्, न हि रसादिकं कस्मिन्नपि प्रतिविम्बे कोऽपि साक्षात् करोति। एतेन प्रतिविम्बवादोऽपि निराकृतः। लोहितशुक्लकृष्णामिति एकधर्म्मावच्छिन्ने इयमिति रीत्या "विशेषणेन च" इति सुपद्मव्याकरणधृतसूत्रनिष्पाद्यविशेषणकर्म्मधारयः। अथवा पृथिव्युपादानककार्य्यबोधकमेवाजामित्यादि वाक्यम्। एवञ्च एकैकपृथिवीपरमाणुव्यक्तौ रूपत्रयमेव उपनिषद्वाक्यविषयः। पृथिव्यां पाकजनानारूपवत्त्वस्य सर्व्वसम्मतत्वात्। परमाण्वन्तराप्रदर्शनेऽपि न न्यूनत्वं यत एकश्रुतिवाक्यं सर्व्वत्र सर्व्वमेव कारणं वक्ति इति न

नियमः। जलादिपरमाणूपादानकत्वस्य च भगवदुक्तत्वात्। तद्-वाक्यन्तु "भूमिरापोऽनलोवायु"रित्यादि अतएव एकजातीयपर-माणुतः, श्वेतरक्तनीलकार्य्यजननं सुष्ठूपपद्यते।

स्वरूपामित्यस्य विग्रहवाक्यं स्वस्या अजाया इव रूपं यस्याः। अजां जुषमाणः सेवमानः परमाणुव्यक्त्योः परस्परं संयोगरूपाणां प्रजात्मकसन्तानासमवायिकारणानामनुगुणक्रियारूपसम्भोगे यत-मान इति यावत्। प्रजासृष्ट्यर्थं पुरुषः पत्नीं सेवत इति प्रसिद्धम्। अनुशेते कर्त्तृभावापन्नः सन् नियतमनुवर्त्तते। एनामित्यनेन सन्नि-हितपदोपस्थाप्यप्रजापरामर्शः, नत्वजामिति पूर्व्वोक्तस्य परामर्शः, व्यवहितपदोपस्थाप्यत्त्वात्। भुक्तभोगामुपभोक्तृयोग्यावस्थितविषयेषु भोगावच्छेदकतनुम्। विग्रहवाक्यन्तु भुक्तेषु भोगो यस्यां, यत्-पदोत्तरं सप्तमी अवच्छेदत्वार्थिका। सप्तम्या अवच्छेदकत्त्वार्थकत्वे प्रमाणं "लोहितो यस्य वर्णेन मुखे पुच्छे च पाण्डरः।" इति महर्षिवाक्यम्।

अथ बह्वीं प्रजां सृजमानामित्यत्र प्रजापदं प्रकृष्टवाचकप्रशब्दो वा व्यर्थः, बह्वीं सृजमानामित्यनेनैव सामञ्जस्यसम्भवात्, अतएव लोकैर्बहूनिजनयतीत्येव प्रयुज्यते, न तु बहूनि जन्यानि जनयति, प्रयोजनासत्त्वे प्रजन्यानि जनयतीत्यपि, अतएव उपनिषदन्तरेष्वपि दृश्यते अहं बहुस्यां प्रजायेय इति। इति चेन्न यतो जननं द्विविधं प्रकृष्टजननभाक्तजननयोर्भेदात्। प्रकृष्टजननञ्च आद्यक्षणसम्बन्धः स च स्वसमयध्वंसानधिकरणक्षणसम्बन्धरूपः। अपरञ्च घटाकाशो जायते, शरीरी जायते, कर्णो जायते इत्यादिस्थले विशेषणस्य जनन-मादाय तादृशोत्पत्तिमद्घटशरीरवत्त्वादिरूपं जननं व्यवह्रियते तदेव गौणम्। अतः प्रजामित्यंशप्रयोगेण शरीरघटपटप्रभृतीनां सर्व्वेषां दर्शितप्रकृष्टजननवत्त्वं सूचितम्। एतेन अद्वैतवादिमतं साङ्ख्यमतञ्च निराकृतम्; अद्वैतवादिमते घटादेर्नित्यब्रह्मात्मकतया

साङ्ख्यमते नित्यप्रकृत्यात्मकतया च तेषु प्रकृष्टजननरूपप्रजात्वा-सम्भवात्। निराकृतश्च जन्यद्रव्याणां परमाणुपुञ्जात्मकतावादः। वहुप्रजानां प्रक्रान्तानां मध्ये तन्वात्मकैकजातीयप्रजाप्राप्त्यर्थं भुक्त-भोगामित्युक्तम्। जहाति चिरं त्यजति तत्त्वज्ञानकाशीमरणाभ्या-मिति पूरणीयम्। तत्त्वज्ञानकाशीमरणाभ्यां देहान्तनिवृत्तेरेव शास्त्रीयत्वात्, न तु द्व्यणुकपर्व्वतादिरूपापरप्रजानिवृत्तेरपि प्रमाणं यथा "अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत" इति "आत्मा-ज्ञातव्यो न स पुनरावर्त्तते" इति च अत्र न स पुनः शरीरी भवतीति गदाधरव्याख्या। इदं ज्ञानमुपाश्रित्य मम साधर्म्म्यमागताः। सर्गेऽपि नोपजायन्ते इति भगवद्गीता च। नोपजायन्ते न शरी-रिणो भवन्ति।

नारायणोपनिषद्वाक्ये सर्व्वत्रैव बह्वीं प्रजामित्येकवचनान्तं दृश्यते तद्वाक्यं यथा अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्। अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्त-भोगामजोऽन्यः॥ सरूपा मित्यस्य विग्रहः, रूपेण सह वर्त्तमानां समानं रूपं यस्या इति वा।

कुत्रचित् पुस्तके बह्वीः प्रजा इति बहुवचनान्तपदं दृश्यते। तत्पाठसत्त्वेऽप्येनामित्यत्रैकवचनं नासाधु प्रक्रान्तवाचकैतत्पदस्य पूर्व्वोक्तप्रजानामभेदान्वयतात्पर्य्याविषयत्वात्। अतएव दाराः सन्ति तां पश्येदित्यादिवाक्यं साधीयः। परन्तु सृजमानामित्यत्रा-त्मनेपदमिव एनामित्यत्रैकवचनमपि श्रौतमिति प्राहुः। अति-व्यवहिताजापदार्थस्यैतत्पदतात्पर्य्यविषयत्वे भुक्तभोगामित्यंशप्रद-र्शनं वैफल्यमापद्येत। नारायणोपनिषद्वाक्ये सर्व्वत्रैव बह्वीं प्रजा-मित्येकवचनान्तं दृश्यते तद्वाक्यं यथा अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्। अजोह्येको जुषमानोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥ सरूपामित्यस्य विग्रहः रूपेण सह

वर्त्तमानां समानं रूपं यस्यामिति वा। अजोऽन्य इत्यंशस्याबाधितार्थकत्वरक्षायै प्रागुक्तसृष्टिकर्त्तृभिन्नो भोक्तृजीवात्मस्वीकार आवश्यकः। एतेन साङ्ख्यमते मूलप्रकृतेः तां जुषमाणस्यपुरुष समूहस्य च द्वयोरेव नित्यत्वं नतु तदन्यस्य कस्यापीति निरस्तम्। जहात्यजोऽन्य इत्यनेन पूर्व्वोक्ताजद्वयभिन्ननित्यस्यैव प्रतिपादितत्वात्। अन्यथा तद्वाक्यं बाधितार्थकं स्यात्। तथाहि एकमात्रधर्म्मिणः स्वप्रतियोग्यनुयोगितया भेदबोधस्य नद्यावित्यादिवाक्याज्जननेऽपि स्वानुयोगितावच्छेदकावच्छिन्ने एकत्र तादृशावच्छेदकघटितधर्म्मावच्छिन्नप्रतियोगिताकभेदबोधियावद्वाक्यान्येवापार्थकानि, एवञ्च अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इत्यत्राजोऽन्य इत्यंशस्यापार्थकत्वं गीर्व्वाणगुरुणापि वारयितुं नहि शक्यते। अजोऽजभिन्नः, जगत्कर्त्तृजभिन्नो बा इत्यादि वाक्यं केऽपि प्रमाणतया न स्वीकुर्व्वन्ति। अतएव एक आकाशो देवदत्तस्य कर्णः, अन्य आकाशो यज्ञदत्तस्यकर्णः, एको महाकालो जन्यद्रव्यवान्, अन्यो महाकालः प्रलयवान् इत्यादि वाक्यं कोऽपि व्युत्पन्नो न प्रयुङ्क्ते। एतेन अद्वैतवादिमतं निरस्तम्। तन्मतेऽजरूपैकधर्म्मिणि अजत्वरूपैकधर्म्मावच्छिन्नभेदप्रतियोगित्वानुयोगित्वयोरवगमेन अपार्थकवाक्यात् प्रमात्मकशाब्दबोधापत्तेः। सम्भावयामिचाद्वैतवादिन एकब्रह्मश्वेतकेतुः, अन्यब्रह्म व्यासः शिवश्चण्डालश्च एको जीवोऽनुभवति अन्यो जीवः स्मरतीति प्रयोक्तुं न साहसिनो भवेयुः। अतएव साङ्ख्यमतनिरासोऽपि, अजभिन्नोऽज इति वाक्यस्यापार्थकत्वात्। न चोपाधिविशेषावच्छिन्नाजभेदस्योपाध्यन्तरविशेषावच्छिन्नेऽजे तद्वाक्येन बोध्यतामिति वाच्यं तथा सत्यनावश्यकाधुनिक लक्षणास्वीकारापत्तेः। गौतमकणाद महर्षिमते तु विना लक्षणां तद्वाक्यस्य सुष्ठूपपत्तिरेव। एवं तन्मते अजापदोपस्थाप्य प्रकृतिबोधतात्पर्य्येणैतदिति सर्व्वनामपदप्रयोगवत्

एकोऽज इत्यंशबोधितार्थस्य प्रक्रान्तस्य बोधतात्पर्य्येण अजोऽन्य इत्यंशस्थले एष इति प्रयोगस्यैव युक्तत्वादिति, न हि घटोऽस्ति घटं पश्य इति प्रयोग औत्सर्गिकः परन्तु घटोऽस्ति तं पश्येत्यादि-प्रयोगः। एतेन साङ्ख्यमतं निरस्तम्। तन्मते नित्यानां द्वैविध्यात्। जीवात्मनामविनाशित्वं भग दृगोतापि प्रमापयति "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः। अनाशिनोऽप्रमेयस्य तस्माद् युध्यस्व भारत!"॥ इति, अत्र शरीरिण इत्यंशस्याद्वैतवादिकल्पिताहं प्रत्ययसाक्षिकाविद्यावच्छिन्नब्रह्मबोधकत्वं न हि सम्भवति। तथा सति तस्याविद्यानाशेनाहमित्याकारकतानाशेन वा तत्र विना-शित्वव्यवहारः स्यात्।

न च तद्वाक्यस्थितनाशबोधकपदं धर्म्मिनाशतात्पर्य्येण भगवता प्रयुक्तम् एवञ्च ब्रह्मात्मकजीवव्यक्तिरूपधर्म्मिणो नाशासम्भवेन तत्ना-नाशित्वप्रदर्शनोपपत्तिरिति वाच्यं तन्मते ब्रह्मरूपधर्म्मिण एव शरी-राद्याकारत्वेन व्यवहृततया अन्तवन्त इमे देहा इत्यंशस्य उन्मत्तप्रल-पितत्वापत्तेः। एवञ्चानाशिनोऽन्तवन्त इति वाक्यद्वयेन जीवदेहयोः को विशेषो दर्शितः। एतेन यावज् जन्येषु ब्रह्मणः पारमार्थिकभेद एव सूचितः।

वस्तुतस्तु प्रागुक्त श्रुतिस्थाजामित्युत्तरं प्रकृतिमिति पूरणीयं, प्रकृतौ लोहितशुक्लकृष्णानामजत्वस्य च विशेषणतया तेजोजल-भूमि-रूपपरमाणवो लभ्यन्ते, भगवता तेषामपि प्रकृतिपदार्थता निर्द्देशात्। भगवद्वाक्यं यथा "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्नाः प्रकृतिरष्टधा"॥ इति अत्र वाक्ये भिन्ना अष्टधा इति पदद्वयसार्थक्याय सर्व्वेषां परस्परं पार-मार्थिकभेदो विभिन्नधर्म्माश्चावश्यं स्वीकर्त्तव्याः। न तु ब्रह्मात्मकत्वं तथासत्यष्टधेत्यनेनैव सामञ्जस्यसम्भवेन भिन्ना इत्यंशप्रदर्शन-वैफल्यापत्तेः। न च तद्वाक्ये प्रकृतिपदपूरणे लोहितशुक्लकृष्णा-

मित्यंशस्याजामित्यंशस्य च व्यर्थत्वमिति वाच्यं प्रकृत्यन्तरव्यावृत्तये तदंशद्वयसार्थक्यात् । जन्यभूतानां परमाण्वात्मकप्रकृत्युपादानकत्वे ब्रह्मकर्त्तृकत्वे च प्रमाणं भगवताप्युक्तम् । तद् यथा "एतद्योनीनि भूतानी"ति, "मयाध्यक्षेण प्रकृतिः सूयते सचराचर"मिति च। अध्यक्षेण उपादानप्रत्यक्षवता । कर्त्तृविधया कारणेन उपादानप्रत्यक्ष-मवश्यमपेक्षणीयमिति तत्प्रदर्शनम् । उक्तगीतास्थमयाध्यक्षेणे-त्यत्र तृतीया तु सहार्थे । प्रकृतिशब्दो गृहार्थकमण्डपशब्दवद् रूढ़ एव । योगेन मण्डपानकर्तृबोधकतत्पदवच्च, प्रकृष्टा अर्थात् नित्यासर्व्वविषयिणी कृतिर्यस्या यस्य वा इति यौगिकार्थबोधक-प्रकृतिशब्दोऽप्यस्ति । यथा—

"प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः ।
अहङ्कार विमूढात्मा कर्त्ताहमिति मन्यते ॥" इति

अस्य भावार्थः—प्रकृतेरर्थाद् ब्रह्मणो ब्रह्मसम्बन्धिना गुणैर्जीवाना-मदृष्टैः करणे तृतीया । गुणैरित्यंशप्रदर्शनं सर्व्वजनसमकरुणस्य ब्रह्मणः पक्षपातित्वशङ्कानिवृत्तये। परेषां गुणैः सत्त्वरजस्तमोरूपगुणै रितिव्याख्यानं न विचारसहं, तथासति तत्प्रदर्शनवैफल्यापत्तिः। कार्य्यवैषम्यानुपपत्तिश्च । अस्माकन्तु अदृष्टवैषम्येण कार्य्यवैषम्यं सुष्टूपपद्यतएव । प्रकृतेरिति तृतीयास्थाने प्रयोजकत्वबोधिका पञ्चमी सम्बन्धे षष्ठी वा श्रौतत्वात् साधीयसी । कर्त्ताहमिति मन्यते अस्यार्थः मोहरूपदोषेण जीववर्गः स्वस्मिन् परानधीन-कर्त्तृत्वं मन्यते । तन्मननं निरुक्तदोष जन्यतया भ्रान्तिरेव "कर्त्ता-कारयिताशम्भु"रिति स्मरणात् । सत्त्वरजस्तमांसि गुणा इत्यत्र सत्त्वपदं बलिदानादिरहितवैधकर्म्मजनितादृष्टानां रजः पदं वैधबलि-दानघटितवैधकर्म्मजन्यादृष्टानां तमः पदञ्च उक्तद्विविधादृष्टभिन्न यावददृष्टानां बोधकम् ।

अतएव "सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः", प्रकृतित्वञ्च

सर्व्वस्यगुणत्रयविभाविनी इत्यार्थस्य सुष्ठूपपत्तिः परमेश्वरस्य जगत्कर्त्तृत्वात्। त्रिगुणात्मिका प्रकृतिरिति व्यवहारश्च बहुव्रीहिगर्भं बहुव्रीहिसमासमाश्रित्य उपपादनीयः। त्रिगुणपदन्तु ज्ञानेच्छाकृतितात्पर्य्यकम्। सत्त्वरजस्तमांसि न गुणान्तराणि, क्लृप्तेनैव ज्ञानेच्छाकृतिरूपविशेषगुणेनोपपत्तावक्लृप्तकल्पनाया अन्याय्यत्वमिति सर्व्वसिद्धान्तिसम्मतत्वात्। "दैवी ह्येषागुणमयी मम माया दुरत्यया॥" अस्य भावार्थः माया पदार्थः परेषां वैचित्र्यदृष्टेरुपयोगिनीच्छा। साच राक्षसी चेत् अतात्त्विकविचित्ररूपादिकं दर्शयति। यथा मारीचराक्षसादिमाया। प्राचीन श्लोकोऽपि—

"आनीता भवता यदा पतिरता साध्वी धरित्री सुता,
स्फूर्ज्जद् राक्षस मायया न च कथं रामाङ्गमङ्गीकृतम्।
कर्त्तुं चेतसि पुण्डरीकनयनं दूर्व्वादलश्यामलं
तुच्छं ब्रह्मपदं भवेत् परवधूसङ्गप्रसङ्गः कुतः॥"

भगवन्माया तु वैचित्र्येण तात्त्विकं दर्शयति, तस्य प्रतारणादिदोषशून्यत्वात्। अतो दैवी गुणमयीति विशेषणद्वयसार्थकम्। भगवन्मायायाः प्रमाया उपयोगितया तत्र गुणत्वप्रदर्शनमपि सुष्ठुसङ्गतम्। भ्रमप्रयोजकेषु दोषत्वस्य प्रमाप्रयोजकेषु च गुणत्वस्य सिद्धान्तिव्यवहारविषयत्वात्। एतेन जगतां मिथ्यात्ववादो निरस्तः। अतएव मायायाः पदार्थान्तरत्ववादिमतमपि निराकृतम्; दैवीदुरत्ययेत्यंशद्वयप्रदर्शनवैयर्थ्यापत्तेः, क्लृप्तेनैवोपपत्तौपदार्थान्तरकल्पनाया सर्व्वैरेवास्वीकाराच्च। मायायाः पदार्थान्तरत्वं स्वीकृत्य केनचिद् यो निबन्धः प्रणीतः तत्र सच्छास्त्रत्वमेव नास्ति भ्रमात्मकबोधजनकत्वात्। एतदेव साङ्ख्यदर्शनभाष्यकृद् विज्ञानभिक्षुधृतं पद्मपुराणीयमागमीयञ्च वचनं प्रतिपादयति। तद्यथा "मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च" इत्यादि॥ सर्व्वज्ञप्रायैरुदयनाचार्य्यैः स्वप्रणीतकुसुमाञ्जलिग्रन्थे मायापदस्यादृष्टार्थकत्वं प्रकाशितम्।

तद्ग्रन्थविवृतिकारैर्वर्द्धमानोपाध्याय हरिदास रामभद्रैस्तत्पदस्य दर्शित एवार्थोऽवधारितस्तच्चिन्त्यं निखिलादृष्टानां माया पदार्थत्वे दैवो माया राक्षसो माया इत्यादि द्विविधव्यवहारानुपपत्तेः।

"दुरत्यया" दुर्बोध्या दुर्निरूप्येति यावत्। दुरत्ययेत्यस्येन धातुघटितत्वात् सकलगत्यर्थकधातवो ज्ञानार्थकाः प्राप्त्यर्थकाश्च— तात्पर्य्यसत्त्वे भवितुमर्हन्ति इति शाब्दिकैरुक्तत्वाच्च।

अथ ब्रह्मतत्त्वनिरूपणम्—

श्रुतिस्थ ब्रह्मबोधकानि पदानि सर्व्वाण्येव सर्व्वकर्त्तृत्वसहितात्मत्वावच्छिन्नबोधकान्येव कम्बुग्रीवासहितघटत्वावच्छिन्नबोधकघटकलसादिपदवत्। "यतो वा इमानि भूतानि जायन्ते" इत्याद्यसङ्ख्यविवृतिवाक्यदर्शनात्। न च तत्तद्वाक्यानि मायारूपोपाध्यवच्छिन्न ब्रह्मपराण्येव। अतस्तत्तद्वाक्यमीश्वरबोधतात्पर्य्यकमेव न तु विशुद्धब्रह्मतात्पर्य्यकम्। धर्म्मिणो भेदाभावेऽपि आनन्दस्वरूपविशुद्धब्रह्मणि जगत्कर्त्तृत्वादिबाधेऽपि च मायारूपोपाध्यवच्छेदेन तादृशकर्त्तृत्वादिमत्त्वस्य स्वीकर्त्तव्यत्वात्। शरीरधारणमपीश्वरस्य न तु ब्रह्मणः कस्मिन्नपि ब्रह्मपदघटितवाक्ये कर्त्तृत्वशरीरधारित्वबोधकपदाप्रयोगादिति वाच्यम्। अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, इति वाक्येन—

"चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।
उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना॥"

इत्यादि प्रमाणेन च विशुद्धब्रह्मत्वावच्छेदेनैव जगत्कर्त्तृत्वशरीरधारणकर्त्तृत्वस्य च सुस्पष्टप्रतिपादितत्वात्। मायायाः पदार्थान्तरत्वस्य प्रमाणलेशास्पर्शनाच्च यां स्वीकृत्य भवतामीश्वरत्वोक्तिः। क्वचिन्निष्कलाद्वितीय ब्रह्मबोधकपदं क्वचिच्च सगुणब्रह्मबोधकपदं प्रयुक्तम्, तद्वाक्यद्वयेनैव शरीरपरिग्रहकर्त्तृत्वं प्रत्याय्यते। तद्यथा—

"चिन्मयस्याद्वितीयस्य निष्कलस्याऽशरीरिणः।
उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना॥"
"परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे॥" इति च।

एतावता किं एकरूपावच्छेदेनैव जगत्कर्त्तृत्वादिकं नाऽऽयातम्? सम्भवामीति स्मारितास्मच्छब्दः परमते मायारूपकलाविशिष्टे कृतिविशिष्टबोधकः। पूर्ववाक्यस्थितनिष्कलशब्दस्तु मायाशून्यबोधकः। तार्किकमते कलाशब्दो मिथ्याज्ञानजन्यवासना, सा च भोगायतनदेहसम्बन्धप्रयोजिका। कलयति देहमुत्पादयतीति व्युत्पत्तेः। जीवेषु यावत् कालं तादृशी कला तिष्ठेत् तावत् कालं सुखदुःखभोगावच्छेदकशरीरधारा जनिष्यते; तादृशी वासना तत्त्वज्ञानान्निवर्त्तते। तत्र प्रमाणं—"भिद्यते हृदयग्रन्थि"रित्यादि।

एवञ्च तादृशनिष्कलत्वं वासुदेवाद्यप्राकृतमूर्त्तिधारिणः परमेश्वरस्याऽपि। एतावता ब्रह्मत्वावच्छेदेनाऽकर्त्तृत्वं, ईश्वरत्वावच्छेदेनैव कर्त्तृत्वमिति किमायातम्? नच ब्रह्मेश्वरपदयोः कियदंशे वैषम्याभावे "तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययमिति वाक्यबोधितयोरेकत्र कर्त्तृत्वतदभावयोः कथमुपपत्तिः? अतः परमते ईश्वरत्वावच्छेदेन कर्त्तृत्वं मायाराहित्यावच्छेदेनाकर्त्तृत्वमिति द्वयमेवोपपन्नमिति वाच्यं यतो वचनस्थितास्मत्पदप्रतिपाद्यतावच्छेदकप्रयोक्तृत्वरूपकृत्यवच्छिन्ने जगत्कर्त्तृत्वबोध एव व्युत्पत्तिसिद्धः, यथा अग्रावच्छिन्नो वृक्षः कपि संयोगवान् इति वाक्यादग्रावच्छेदेन कपिसंयोगवत्त्वं प्रतीयते—इति मतद्वय एव समानम्। परन्त्वद्वैतवादिमते विद्ध्यकर्त्तारमिति वाक्यं बाधितार्थकमेव, निरुक्तयुक्त्या अस्मत्पदार्थतावच्छेदकीभूतप्रयोगानुकूलकृतिविशिष्टे कर्त्तृत्वाभावप्रत्ययः कथमपि न भवितुमर्हति, आहार्य्यत्वात्। एवमुत्पत्तिकालावच्छेदेन घटे गन्धाभावस्य मूला-

वच्छेदेन वृक्षे कपिसंयोगाभावस्य च सत्त्वेऽपि द्वितीयादिक्षणावच्छिन्नो घटो गन्धाभाववान्, अग्रावच्छिन्नो वृक्षः कपिसंयोगाभाववान् इत्यादि वाक्यं जात्वपि न प्रमाणम्। तस्मात् विश्वस्यकर्त्तारमित्यत्र कृञ् धातोः फलोपहितकृतिलाक्षणिकत्वस्वीकारं विना कस्याऽपि निस्तारा भावात्। एवञ्च तद्वाक्यस्य फलोपहितकृतेरभाववान्, जगद्विषयकनित्यकृत्तिमांश्च इत्येवार्थः पर्य्यवसितः। एवञ्च का विरोधवार्त्ताऽपि। अथ लक्षणां स्वीकृत्य भगवद्वाक्योपपादनेऽस्मच्छब्देन विशुद्धब्रह्मण्येव लक्षणाऽस्तु मायाराहित्यरूपविशुद्धत्वावच्छेदेन कृतिसामान्याभाव इत्यद्वैतसिद्धान्तः समीचीन इति चेन्न यतः “न मां कर्म्माणि लिम्पन्ति न मे कर्म्मफले स्पृहे”ति भगवद्वाक्येन स्वफलीभूतसुखाद्युपहितेच्छाराहित्यं प्रतिपाद्यते एवञ्च यो यः स्वनिष्ठफलेच्छावदन्यः स स्वनिष्ठफलोपहितकृतिमदन्य इति नियमस्य सर्व्वसिद्धत्वम्। अतएव विश्वस्यकर्त्तारमित्यंशस्य फलोपहितकृत्यभावपरतया फलोपहितकृतिमदन्यपरतया वा व्याख्यानं समीचीनमेव। अपि च मायावच्छेदेन कृतिमत्यपि ब्रह्मणि मायाराहित्यावच्छेदेन कृतिसामान्याभाववत्त्वकल्पनं न युक्तम्, तथा सति ब्रह्मणि कृतिसामान्याभावाधिकरणतायाः स्तदवच्छेदकतायाश्च अक्लृप्तायाः कल्पने महागौरवम्। अतएव “सामानाधिकरण्यवतो न तदभाववत्त्व”मिति दीधितिलिखनं साधु सङ्गतम्। अतो विशुद्धब्रह्मणि अस्मच्छब्दस्य लक्षणामस्वीकृत्य फलोपहितकृतौ लक्षणास्वीकारः किं न युक्तिपथमारोहति?

अपि चाऽविनाशिनो गुणस्य दैशिकाव्याप्यवृत्तित्वमपसिद्धान्तकवलितमेव। न चेश्वरकृतौ विनाशित्वं स्वीक्रियते इति वाच्यं तथा स्वीकारे विनाशकल्पनानिबन्धनगौरवात् भगवतोऽङ्गषट्कबोधकवाक्यान्तर्गतस्याऽलुप्तशक्तिश्चेत्यंशस्य बाधितार्थकत्वापत्तेश्च। शक्तिः कृतिरेव। अन्यच्च दुर्व्वचम्। स्वकीयसुखादिरूपप्रयोजनोपहितप्रयत्नवदन्य-

त्वार्थकं विश्वकर्त्तारमित्यंशप्रदर्शनेन सकलजीवापेक्षया स्वस्मिन्नुत्-कर्षः सूचितः, अयं भावः सकलकार्य्यजनने मय्यमोघप्रयत्नरूपशक्ति-सत्त्वेऽपि स्वफलार्थं किमपि न करोमि। अद्वैतवादिनस्तु सामा-न्यतः कृतिमदन्यार्थकतया तद्वाक्यं व्याख्यातवन्तः। तद्व्याख्यां समीचीनतया न मन्यामहे। अत्र तत्प्रदर्शनस्याऽनावश्यकत्वात्। यतस्तद्वाक्यं न कैवल्यप्रकरणीयम्। वस्तुतः कैवल्येऽपि सामा-न्यतः कृतिमदन्यत्वप्रकारेण ब्रह्मज्ञानस्य नोपयोगः, परन्तु कृतिमत्त्वे-नैव तज्ज्ञानस्य इत्येव प्रमाणतोऽवगतम्। प्रमाणं यथा—"यदा पश्यः पश्यते" इत्यादि, तज्जलानिति शान्त उपासीत इति च।

"अथ तमेव विदित्वाऽतिमृत्युमेति नाऽन्यः पन्था विद्यतेऽयनाय" इति श्रुतिस्थैवकारस्य ब्रह्मोत्तरविषयकज्ञानव्यावृत्तिबोधकतया तद्वाक्यतो ब्रह्मणि निर्व्विकल्पकज्ञानं मुक्तिजनकमित्येव लभ्यते, एवञ्च कथं कर्त्तृत्वादिरूपनिखिलब्रह्मतत्त्वानामपि मोक्षकारणीभूत-ज्ञानस्य प्रकारविषयत्वे एवकारार्थबाध इति चेन्न—तमेवात्र द्वितीयया विशेष्यत्वरूपविषयताविशेषपरत्वस्यैव उपगमात्, यतो विशेष्यताबोधतात्पर्य्येण द्वितीयाप्रयोगोऽप्यौत्सर्गिकः,। दृश्यते च लोके एतत्क्षणे सुखमेवानुभवामि न तु दुःखं इदानीं पद्म-वक्त्रमेव स्मरामि नान्यदेवं अयं संस्कृतवाक्यमेव वेत्ति नतु पाश्चात्य-भाषामित्यादिकः प्रयोगः। इत्यादीनि वाक्यानि किं निर्व्विकल्पक-ज्ञानं बोधयति? अतएव कर्त्तारमीशं तज्जलानित्यादिमोक्षोपायी-भूतज्ञानबोधकवाक्ये कृतिमदादिबोधकपदप्रयोगोऽपि सुष्ठु सङ्गतः। "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्"॥ इति भगवद्गीतापि सुसङ्गच्छत एव।

केचित्तु श्रुतिस्थैवकारं विदित्वेत्यनेन योजयन्ति। अथ तद्वाक्ये "नाऽन्यः पन्था विद्यतेऽयनाये"त्यंशसत्त्वेन ब्रह्मज्ञानभिन्नः कोऽपि न मोक्षोपायो भवेदित्येवाऽवगम्यते। एवञ्च बहुपुराणवाक्यत उप-

निषद्वाक्यतश्च वाराणसीमरणान्मुक्तिर्भवेदित्येवावगम्यते—कथं तदुपपत्तिरिति चेन्न नान्यः पन्था इत्यनेन ब्रह्मज्ञानभिन्नज्ञानस्यैव एवकारव्यावर्त्तनीयतात्पर्य्योपगमात्।

अथवा काश्यां मरणपूर्व्वकाले भगवता तारकमन्त्रोपदेशानन्तरं तत्क्षण एव ब्रह्मज्ञानं लब्ध्वा कैवल्यं लभते इत्येव उपगन्तव्यम्। एवञ्च "तज्जलानिति शान्त उपासीत", "यदा पश्यः पश्यते रुक्मवर्णं। कर्त्तारमीश"मित्यादिबहुवाक्यानि "अथातो ब्रह्मजिज्ञासा" "जन्माद्यस्य यत" इति सूत्रञ्च दृष्ट्वाऽवधारितं जगत्कर्त्तृत्वादिरूपेणैव ब्रह्मज्ञानं कैवल्यसाधनं न तु निर्व्विकल्पकतज्ज्ञानम्।

त्रिमूर्त्ते मूर्त्तान्तश्वर परममूर्त्या विरहितं
स्वरूपन्ते ज्ञानं परममिति वाचालवचनम्।
ममाशा किन्त्वेषा दृषदुपमिते दासहृदये
ध्रुवादीनामन्तश्चरचरणपद्मं विचरतु॥

विचारोऽयं यथा तथास्तु परन्तु भो भो दस्यवश्चौराः, भो दस्युसहायाः सत्यवादिनो यूयमद्वैतवादं पठन्तः तावता "तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययमितिभगवद्वाक्यस्याद्वैतवादिनो व्याख्यां सुप्रिव्युराजविचारालये शालग्राममशिलां गङ्गासलिलञ्च स्पृष्ट्वा निर्भीकमेव वक्तुं प्रभविष्यथ, वयं न दस्यव इमे च न दस्यव इत्यादिसत्यवाक्यानि, भगवति ब्रह्मत्वावच्छेदेन कर्त्तृत्वस्येव जीवेष्वपि विशुद्धब्रह्मत्वावच्छेदेन दस्युत्वाभावादेर्व्युत्पत्तिसिद्धत्वात्।

न च सर्व्वांशेन ब्रह्मेश्वरयोरैक्ये निर्गुणं परमं ब्रह्म इत्यस्य का-गतिरीश्वरे जगत्कर्त्तृत्वादिरूपगुणानां बहुवाक्यत एवावधारणा-दिति वाच्यं तत्र गुणपदस्य शब्दादिरूपवहिःप्रत्यक्षविषयविशेषगुण-सामान्ये लाक्षणिकत्वस्वीकारावश्यकत्वात्। गुणसामान्यपरत्वे "अशब्दमस्पर्शमरूपमव्ययं तथा रसं नित्यमगन्धवच्च यत्। अनाद्य-नन्तं महतः परं ध्रुवम्। निचाय्य तं मृत्युमुखात् प्रमुच्यते॥" इति

कठोपनिषद्वाक्येन पञ्चविधविशेषगुणाभावानामुक्तेरसङ्गतत्वापत्तिः। अतएवानन्दबोधात्मकगुणे रूपस्पर्शशब्दादिगुणराहित्यस्य सर्व्वजनसुप्रसिद्धत्वेन "अशब्दमस्पर्शमित्यादिवाक्यानामनाकाङ्क्षिताभिधानत्वापत्तिभिया विज्ञानानन्दरूपगुणे ब्रह्मत्वव्यवस्थापनमसमीचीनतया मन्यामहे। तस्य गुणभिन्नत्वं विज्ञानभिक्षुधृतेन "ज्ञानं नैवात्मनो धर्म्मो न गुणो वा कथञ्चने"तिमहर्षिवाक्येन प्रतिपादितम्। अतो "यः सर्व्वज्ञः सर्व्वविदि"त्यादिवाक्यसमानार्थकेन "नित्यं विज्ञानमानन्दं ब्रह्मे"त्यादिवाक्येन ब्रह्मजिज्ञासानिवृत्त्यर्थं व्यासप्रयुक्त "जन्माद्यस्य यत" इति सूत्रेण च ज्ञानसृष्टिकर्त्तृत्वरूपगुणवत्त्वस्य प्रतिपादिततया ब्रह्मणि द्रव्यात्मकत्वमेव सर्व्वैर्व्युत्पन्नैरवधारितम्। किन्तदाकाशरूपद्रव्यमित्याशङ्कानिवृत्त्यर्थमशब्दमित्युक्तम्। अयं भावः यतः शब्दरहितः अतोऽसौ नाकाशः। अथ क्षित्यप्तेजोमरुदन्यतमान्तर्गतमेवास्तामित्याशङ्कानिवृत्त्यर्थमस्पर्शमिति, क्षित्यप्तेजोऽन्यतमान्तर्गतत्वरूपविशेषशङ्कायाः क्षितिजलान्तर्गतत्वशङ्कायाश्च निवृत्त्यर्थमरूपमरसमित्युक्तं "सम्भेदे नान्यतरवैयर्थ्य"मितिन्यायेन अरूपमरसमिति प्रदर्शनं नाऽसङ्गतम्। अतएवैकस्याऽनुमित्यर्थं बहुहेतुप्रयोगो न हि निग्रहप्रयोजकः; तत्प्रयासस्य महर्षिसम्मतत्वात्। तद्वाक्यं "मन्तव्यश्चोपपत्तिभि"रिति, उपपत्तिभिर्बहुभि र्हेतुभिः। तज्जीवात्मरूपमास्तामित्याशङ्का च भगवद्वाक्येन निराकार्य्या। तद्वाक्यन्तु "न मां कर्म्माणि लिम्पन्ति" इत्यादि; कर्म्माणि अदृष्टानि। "मा भुक्तं चोयत" इति वाक्येन तथैव प्रतिपादितत्वात्। एवञ्च यतोऽदृष्टशून्यं, अतो नाऽसौ जीवः। अथ कथं न तत्कालदिगन्यतररूपमिति चेन्न सर्व्वज्ञप्रायेण चिन्तामणिदीधितिकृता कालदिशोरीश्वरानतिरिक्ततया एव व्यवस्थापितत्वात्। कालस्येश्वरानतिरिक्ततायाः "कालस्वरूपं रूपं तद्विष्णोर्मैत्रेय वर्त्तते।" इति प्रमाणबलेनाद्वैतवादिनोऽपि तत्स्वीकारावश्यकत्वम्। वृह धातु-कर्त्तृ

विहित-मन्-प्रत्ययाभ्यां निष्पादितब्रह्मन्शब्दार्थस्य बृहत्त्वस्य सत्त्वात् सर्व्वगतत्वाच्च तन्मनो न इत्यास्ताम्।

एवम् "आकाशवत् सर्व्वगतश्च नित्य इतिवाक्येन सर्व्वमूर्त्तसंयोगरूपगुणवत्त्वकथनं विरुध्येत। एतद्वाक्येनाकाशस्य नित्यत्वमित्यपि व्याख्यातम्। तस्य ब्रह्मोपादानकत्वरूपजन्यत्वे ब्रह्मणः शब्दवत्त्वापत्तेर्दुर्व्वारत्वात्। परमाणूनामप्यजन्यत्वं तेषां ब्रह्मोपादानकत्वे ब्रह्मणोऽपि रूपवत्त्वापत्तेः। कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति व्याससूत्रप्रदर्शिततर्कोऽपि सुष्ठुसङ्गतः। एवञ्च कृतिमायासंयोगरूपगुणाश्रयत्वेन गुणेषु गुणवत्ताया असम्भवेन च ब्रह्मण आनन्दस्वरूपता कथमपि न सम्भवति।

वस्तुतस्तु निर्गुणं परमं ब्रह्मेत्यत्र निर्गुणपदघटकगुणपदं सत्त्वरजस्तमोरूपगुणत्रयबोधकमेव, यतः सर्व्वैरेव ब्रह्मान्वयिनिर्गुणत्वस्य तादृशगुणत्रयाभावरूपतैवावधारिता। सत्त्वरजस्तमांसि सात्त्विककर्म्मप्रसूतादृष्ट--राजसकर्म्मप्रसूतादृष्ट--तद्भिन्नादृष्टैतत्त्रिविधरूपाणि, तादृशगुणानामुत्पादविनाशशालित्वेऽपि वीजाङ्कुरवत् तद्धारायाः अनादित्वमकामेनापि स्वीकर्त्तव्यमन्यथानादिपरम्परागतनिखिलशरीरादीनां तदवच्छिन्नभोगादीनाञ्च वैचित्र्यं न स्यात्। भगवतः सर्व्वकर्त्तृत्वेन सुतरां तादृशसकलादृष्टकर्त्तृत्वमपि। अत्र प्रमाणं—"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः"। "प्रकृतिस्त्वञ्च सर्व्वस्य गुणत्रयविभाविनी"त्यादि। अत्र प्रकृतिशब्दो नित्यकृतिमद्ब्रह्मबोधको बहुव्रीहिः, विग्रहवाक्यन्तु नित्या कृतिर्यस्य यस्या वा, विभाविनी उत्पादिका। ब्रह्मण ईदृशगुणशून्यत्वेऽपि जीवगततत्तद्गुणसहकारेण लीलया स एवाद्वितीयः पूरुषः पुंशरीरं स्त्रीशरीरं वा धृत्वा जगत् सृजति। श्रुत्यादिवाक्यानामुक्तमेवार्थमवधारितवतश्चिन्तामणिग्रन्थकृतो जगज्जननीं कालिकां साक्षात् कृतवतो गङ्गेशोपाध्यायस्य मङ्गलाचरण श्लोकोऽपि—

"गुणातीतोऽपीशस्त्रिगुणसचिवस्त्रास्त्ररमय
स्त्रिमूर्त्तिर्यः सर्गस्थितिविलयकर्म्माणि तनुते।
कृपापारावारः परमगतिरेकस्त्रिजगतां
नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे॥

अस्य भावार्थः—ब्रह्म निखिलादृष्टशून्यं नितरां सौभाग्यहीनं तथापीशः, अर्थात् स्वेच्छया सर्व्वं कर्त्तुं क्षमः, अथ स ईशः, सर्व्वान् प्रत्येकजातीयकार्य्यं कथं न करोतीत्याशङ्कायामाह त्रिगुणसचिवः, अयं भावः जीवानां शुभादृष्टानि दुरदृष्टानि सहकृत्य प्रतिपालनं करोति। एतेन भगवति पक्षपातित्वदोषशङ्काऽपि निरस्ता। सांख्य-मतन्तु मूलप्रकृतिः पुरुषादन्या पदार्थान्तरं सा नित्या सत्त्वरज-स्तमोरूपाविविधगुणात्मिका सुतरां तादृशगुणा अपि नित्या तन्मतं न समीचीनं, दर्शित महर्षिवाक्याभ्यां सत्त्वादिगुणानां जन्यताया एव सुस्पष्टप्रतिपादनात्। एतेन माया पदार्थान्तररूपानुत्पन्ना विनाशशालिनी सैव सत्त्वादिगुणात्मिकेत्यद्वैतवादिमतमपि निरस्तं तादृशगुणानामुत्पन्नत्वान् मायाया अनुत्पन्नत्वेन प्रागुक्तयुक्त्या विना-शित्वासम्भवात् तत्सिद्धेरणुमात्ररूपवलवत्प्रमाणलेशेनाप्यस्पर्शनात्; केनापि वेदवाक्येनापरिचितत्वाच्च। अद्वैतवाद्युक्तमायाया अवैदिकत्व-मित्यत्र प्रमाणमपि प्रदर्शितं सांख्यदर्शनभाष्यकृद्विज्ञानभिक्षुणा, तदुक्तिर्यथा—"वेदार्थवन्महाशास्त्रं मायावादमवैदिक"मित्यादि।

वस्तुतस्तु "पिता स्वर्गः पिता धर्म्मः" "सर्व्वतीर्थानि जाह्नवी" "ॐकारं परमं ब्रह्म" "आपो नारायणः स्वयं" "ब्रह्म हविः" "कामो दाता कामः प्रतिग्रहीता" "घट त्वं धर्म्मरूपोऽसि" "सर्व्ववाद्यमयी घण्टा" इत्याद्यसख्यवाक्यानां शन्नो मित्रः शं वरुणः शन्नोभवत्वर्य्यमा। शन्न इन्द्रो वृहस्पतिः शन्नो विष्णुरुरुक्रम इत्याद्युपनिषद्वाक्यानाञ्च यथा पित्रादीनां मङ्गलस्य च प्रशंसावादत्वं तथा "नित्यं विज्ञान-मानन्दं ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दो ब्रह्मेति व्यजानात्"

"विज्ञानं ब्रह्मेति व्यजाना"दित्याद्युपनिषद्वाक्यानामपि सर्व्वजनाभीष्टविज्ञानानन्दयोः प्रसंसार्थवादत्वमेव न तु ब्रह्मस्वरूपनिरूपकत्वम्। तथा सति "अन्नं ब्रह्मेति व्यजानात्" "अन्नाद्व्येव खल्विमानि भूतानि जायन्ते" "प्राणो ब्रह्मेति व्यजानात्" "प्राणाद्व्येव खल्विमानि भूतानि जायन्ते" "मनो ब्रह्मेति व्यजानात् मनसोह्येव खल्विमानि भूतानि जायन्ते" इत्यादि वाक्यान्यपि कथं न ब्रह्मस्वरूपबोधकानि भवेयुः। इष्टापत्तौ असंख्यविशुद्धब्रह्मापत्तिः। न च "सर्व्वं खल्विदं ब्रह्मे"तिवाक्येन निखिलवस्तूनामेव ब्रह्मस्वरूपताप्रतिपादनात् प्राणत्वमनस्त्वरूपोपाधिना ब्रह्मस्वरूपस्यैव धर्म्मिणो लाभसम्भवेन तद्वाक्यान्यपि न वाधितार्थकानि इति वाच्यं तद्वाक्यस्य सर्व्वस्मिन् ब्रह्मस्वरूपताबोधकताया मत्कृता"द्वैतवादखण्डन" ग्रन्थे वहुधानिराकृतत्वात्, तत्स्वीकारे "चण्डाले ब्रह्म चण्डालादेव ब्राह्मणो जायते" इत्यादि वाक्यानामपि प्रामाण्यं स्यात्।

इदमपि रहस्यं, अद्वैतवादिमते तु कस्यापि वाक्यस्याप्रामाण्यं न पश्यामि। यत "एष बन्ध्या सुतो याते"त्यादिवाक्यस्यापि प्रामाण्यं, तस्या अपि ब्रह्मस्वरूपत्वात् ब्रह्मणो जगत्कर्त्तृत्वाच्च।

अथ बन्ध्याया ब्रह्मस्वरूपत्वेऽपि अविद्याविशिष्टायां तस्यां सुतकर्त्तृत्ववाधेन न तादृशवाक्यस्य प्रामाण्यमिति चेद्भवन्मते किं मनस्त्वरूपोपाध्यवच्छिन्ने जगत्कर्त्तृत्वं वर्त्तते? अतो मनस्त्वादिरूपोपाध्यवच्छिन्ने कर्त्तृत्वप्रतिपादकवाक्ये प्रशंसार्थवादत्वमकामेनापि भवता स्वीकर्त्तव्यम्। एवमद्वैतवादिमते "अनुष्टुभो वा इमानि भूतानि जायन्ते अनुष्टुभा जातानि जीवन्ति अनुष्टुभं प्रयन्त्यभिसंविशन्ति तस्यैषा भवति अनुष्टुप् प्रथमा भवति अनुष्टुप् उत्तमा भवति, वाग् वा अनुष्टुप् वाचैव प्रयन्ति वाचैवोद्यन्ति परमा वा एषा छन्दसां यदनुष्टुविति"। इदमप्युपनिषद्वाक्यं किं ब्रह्मस्वरूपबोधकम्?

न चेदमविद्यावच्छिन्नब्रह्मबोधकमेव, शब्दस्याऽपि ब्रह्मस्वरूपत्वादिति वाच्यं तथा सति निखिलच्छन्दसां मध्ये अनुष्टुभः परमत्वकीर्त्तनस्याऽत्यन्तासङ्गतत्वापत्तेः; सकलच्छन्दसामेव ब्रह्मस्वरूपत्वात्।

अपिच— "वेदानां सामवेदोऽस्मि

देवानामस्मि वासवः।

इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥"

* * * *

अक्षराणामकारोऽस्मि द्वन्दः सामासिकस्य च॥

* * * *

मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः।"

इत्यादिवाक्यानां किमविद्यावच्छिन्नब्रह्मबोधकत्वम्? तथा सति पौषाद्येकादशमासानां वर्षादिपञ्चर्तूनां द्वन्द्वभिन्नसमासानां किमविद्यावच्छिन्नब्रह्मानात्मकत्वम्? इष्टापत्तौ ब्रह्मणः सर्व्वस्वरूपतासिद्धान्तो व्याहन्येत। इत्थञ्च मनसोन्द्रियत्वं नास्ति इत्यद्वैतवादिसिद्धान्तो भ्रान्तिमुलक एव, "इन्द्रियाणां मनश्चास्मीति" भगवद्वाक्येन मनस इन्द्रियत्वस्य सुस्पष्टप्रतिपादितत्वात्, महर्षिगौतमकणादादिभिस्तेष्विन्द्रियत्वस्य स्वोक्ततत्वाच्च।

इदं पुनरत्राऽवधेयं सर्व्वं खल्विदं ब्रह्मेतिवाक्यस्थित-सर्व्वपदं यावज्जन्यबोधपरया व्याख्यातमद्वैतवादिना। तन्मतेऽपि तादृशव्याख्या न भवितुमर्हति, बाधितार्थकत्वापत्तेः। तथा हि अवधारणार्थकविभक्तिघटितेन भगवद्गीतावाक्यकूटेन इन्द्रभिन्नदेवानात्मकत्वस्य उच्चैःश्रवोभिन्नतुरगानात्मकत्वस्य गरुड़भिन्नविहङ्गमानात्मकत्वस्य अश्वत्थभिन्नवृक्षानात्मकत्वस्यापरबहुजन्यानात्मकत्वस्य च सुस्पष्टप्रतिपादिततया श्रुतिस्थसर्व्वपदस्याऽशेषजन्यपरत्वे गीतावाक्यसमूहस्य विरोधो दुष्परिहरः। भगवत्गीतावाक्यानि यथा—

अश्वत्थः सर्व्ववृक्षाणां * * उच्चैःश्रवसमश्वानां * *

ऐरावतं गजेन्द्राणां * * आयुधानामहं वज्रं * *
सर्पाणामस्मि वासुकिः। मृगाणाञ्च मृगेन्द्रोऽहं
वैनतेयश्च पक्षिणामित्यादीनि।

तस्मात् सर्व्वपदस्याशेषवाचिताया इव अनेकवाचिताया अपि सर्व्वसम्मतत्वेन "सर्व्वं खल्विदं ब्रह्मेति"वाक्यस्येदम्पदमहिम्ना च भगवद्वाक्यविरोधभङ्गाय निर्धारणषष्ठीतोऽवधारितजन्यमात्रपरत्वं सर्व्वपदस्येत्यद्वैतवादिनामवधारणं किं न युक्तम्? सम्भावयामि च "सम्भवत्येकवाक्यत्वे वाक्यभेदो न चेष्यते॥ इतिमीमांसकवाक्यस्याथमद्वैतवादिनो जानन्ति सर्व्वपदस्य तात्पर्य्यसत्त्वे कतिपयानेकत्वबोधकत्वमौत्सर्गिकम्,—यथा—"चान्द्रायणेन चैकेन सर्व्वपापक्षयो भवेत्॥ सर्व्वां विद्यां लभन्ति ते" "विद्वान् सर्व्वत्र पूज्यते" सर्व्वशुक्ला सरस्वती" "सर्व्वं पुनन्तु मामापो" "सर्व्वस्योपरि चन्द्रमा" इत्यादि। न च भगवद्वाक्यानि तत्तत्पदार्थानां प्रशंसावादात्मकान्येव इति वाच्यं यतः सर्व्वमित्यादि वाक्यं—"ब्राह्मणे गविहस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।" "समः सर्व्वेषु भूतेष्वि"-त्यादिभगवद्वाक्यबोधितविवेकतात्पर्य्यकमेव। अवधारणार्थकतद्वाक्यनिकरस्तु प्रकृतार्थपर एवेति निर्णयः किं नियुक्तिपथमारोहति? एकस्य द्विकस्य वा वाक्यस्य यथाश्रुतार्थकत्वकल्पनमुपेक्ष्य भगवद्वाक्यनिकरस्य यथाश्रुतार्थकत्वरक्षाप्रयासस्याद्वैतवादिनां समुचितत्वात्।

नाद्वैतवादिनां तृप्तिः शतयुक्तिश्रुतावपि।
न भूरिवारिणा शाम्येत् पिपासा सान्निपातिकी॥

"असद्वा इदमग्रआसीत् ततो वै सदजायत, तदात्मानं स्वयमकुरुत, तस्मात् तत् सुकृतं रसोवैसः। रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति, एषह्येवानन्दयाति"। असत्पदबोध्यः परमाणुरेव। विग्रहस्तु न सत्—नच सादृश्यवाचि सत्पदं ब्रह्मवाचि। सादृश्यन्तु

भूतजनकत्वे सति नित्यत्वादिना, सदजायतेत्यंशस्य भावार्थः —सत् अर्थात् पारमार्थिकं वस्तु अजायत। एतेन जगतां मिथ्यात्वस्वीकृदद्वैतवादिमतं निराकृतम्। जगतां मिथ्यात्वे श्रुतिस्थसत्पदप्रयुक्तिर्वैफल्यमापद्येत। अजायतेत्यंशेनैव सामञ्जस्यात्। भगवद्गीताऽप्येवमेवाऽऽह—"नाऽसतो विद्यते भावो नाऽभावो विद्यते सतः॥" "अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां सृजमाना"-मित्यादिश्रुतिस्थप्रकृष्टजननार्थकप्रजापदप्रयोगोऽपि अद्वैतवादि-मत-निरासार्थमेव। अन्यथा प्रजामित्यनुक्त्वा बह्वीं सृजमानामिति प्रयोगेणैव सामञ्जस्यं भवेत्॥

तदात्मानं स्वयमकुरुत इत्यंशस्य भावार्थस्तु तद् ब्रह्म आत्मानं "उपासकानां कार्य्यार्थं ब्रह्मणोरूपकल्पने"तिवचनप्रामशरीरं स्वयं परमाणुमात्रं सहायीकृत्य विनैव शुक्रशोणितमकुरुत। अतएव अकुरुतेत्यत्र भूतकालप्रयोगोऽपि सुष्ठु सङ्गतः। तत्तच्छरीरस्य सृष्ट्यादौ कृतत्वात्। अत्रात्मशब्दस्य शरीरबोधे कोषो यथा—"आत्मा यत्नधृतिस्वान्तस्वभावपरमात्मसु। जीवबुद्धिशरीरे"ष्विति॥"

"आत्मायत्नोधृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्मच" इत्यमरश्च। असत्पदस्य परमाणुबोधकत्वं स्पष्टयति सरसइत्याद्यंशेन। अत्र तत्पदेन प्रक्रान्त आत्मैव प्रतिपाद्यतामिति तु नाऽऽशङ्क्यम्, "अशब्दमस्पर्शमरूप-मव्ययं तथाऽरसं नित्यमगन्धवच्च यदि"तिश्रुत्यात्मन्यरसत्वप्रतिपादनात्, अत्र स रस इतिश्रवणाच्च। सुकृतपदं बहुव्रीहिसमासनिष्पादितं विग्रहस्तु सुष्ठु कृतमर्थाज्जन्यं यस्मात्। अयं भावः पुष्पपयः-प्रभृतीनां भगवदुपादेयत्वे माधुर्य्यगन्धादिरूपोत्कर्षेण उक्तकार्य्याणां सौष्ठवं नहि सम्भवति, ब्रह्मणोरसगन्धाद्यभावात्, उपादानगत विशेषगुणानामेव उपादेयगततादृशगुणोत्पादकत्वस्य सर्व्वसम्मत-त्वात्। अद्वैतवादिनस्तु रसः स अर्थात् आत्मा रस आस्वाद्य इति व्याख्यातवन्तः; तन्न समीचीनं तत्प्रदर्शनस्य व्यर्थतापत्तेः सिद्धे

वस्तुनि रसधातुवाच्येच्छाविषयत्वाभावाच्च न ह्यात्मा भवत्विति कोऽप्यभिलपति । तस्मादत्र रसपदं षड्रसबोधे रूढ़मेव । एवं "रसं ह्येवायं लब्ध्वाऽऽनन्दीभवती"त्युत्तरवाक्यस्याऽत्यन्तासङ्गतत्वापत्तिः । केनचिच्च श्रुतिस्थसुकृतपदं पुण्यपरतया व्याख्याय असत्पदस्य पुण्यरूपादृष्टबोधकत्वमवधारितं जीवादृष्टानि सहकृत्यैव ब्रह्मणो जगज्जनकत्वादिति व्याख्यातम् । तन्न मनोज्ञं पुण्यस्य पापस्य च द्वयं सहकृत्य सृष्टिकरणात् सुकृतपदेनाऽसत्पदस्य विवृतेरत्यन्तासङ्गतत्वापत्तेः, अदृष्टेषु रसवत्तासत्त्वाच्च । रसं ह्येवाऽयं लब्ध्वानन्दीभवति । अस्य भावार्थः—एष आत्मा परमाणुचयं सहकृत्य स्वयं सृष्टादौ आनन्दीभवति, अर्थात् साधकानामानन्दजनकशरीरं परिगृह्णाति । अतएव उत्पत्तिबोधक-भवतीतिवाक्यमप्यबाधितार्थकम् । अद्वैतवादिना आनन्दीति च्विप्रत्ययान्तपरतया व्याख्यातं तदतीवाऽसङ्गतम्, च्विप्रत्ययस्याऽभूततद्भावार्थकत्वेन उक्तश्रुतिस्थानन्दीत्यंशस्य भवतीत्यंशस्य च बाधितार्थकत्वापत्तेः, तन्मते आनन्दस्य नित्यत्वेन पूर्व्वकालेऽपि सत्त्वात् उत्पत्तिमत्तया व्यवहाराभावाच्च । तादृशशरीरपरिग्रहद्वारा जीवान् आनन्दयति च, साकारत्वेन भगवदुपासनाया एव ऐहिकपारलौकिकनिखिलानन्दजनकत्वात् । प्रमाणान्तरमपि "उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना ।" एतेनाऽनन्दस्य नित्यत्ववादो निरस्तः, आनन्दयतीत्यंशेन तस्य जन्यतायाः सुस्पष्टप्रतिपादनात् । भवति चानन्दं करोतीत्येवप्रयोगः । ब्रह्म करोतीत्यादिको ब्रह्मयतीत्यादिकश्च प्रयोगो न हि जात्वपि भवितुमर्हति । एतेन ब्रह्मणो बोधानन्दस्वरूपता निरस्ता ॥ तस्मात् श्रुतिस्थज्ञानानन्दपदार्थे ब्रह्माभेदारोप एव भगवदभिप्रेतः ; श्रुतिस्तु आनन्दबोधयोः प्रशंसार्थवाद एव । व्यक्तिविशेषवाचिदेवदत्तादिनामवदानन्दादिपदं ब्रह्मणो नाम चेत् तत्र न वयं विवदामहे । वस्तुतस्तु नित्यं विज्ञानमानन्दं ब्रह्मेति श्रुतिस्थनित्य-

मित्यंशसार्थक्याय,नित्यज्ञानाश्रय आनन्दजनकं ब्रह्म इत्येवाऽर्थः। नित्य-मिति ज्ञानरूपक्रियायां विशेषणतात्पर्य्यकं द्वितीयान्तम्। तादृश-द्वितीयाकारकत्वातिदेशेन च न वृत्त्येकदेशार्थान्वये निराकाङ्क्षम्। विज्ञानमिति बहुव्रीहिनिष्पादितं, विग्रहस्तु विशेषेण ज्ञानं यस्य, भगवज्ज्ञाने विशेषः सर्व्वविषयकत्वं, योगिज्ञानव्यावृत्तये नित्यमिति। अथ वा प्रणवान्नप्राणादिप्रशंसार्थवादेषु ब्रह्मपदप्रयोगदृष्ट्या ब्रह्मणो जन्यत्वशङ्काया निवृत्तये नित्यमिति ब्रह्मण्येव विशेषणम्, न तु विज्ञाने। भगवज्ज्ञाने नित्यत्वस्य विशेषवाचि'वि'शब्देनैव लाभात्। ब्रह्मणोऽङ्गषट्कबोधकवाक्यान्तरेण भगवतो ज्ञानस्य नित्यतायाः सुस्पष्टप्रतिपादितत्वाच्च। वाक्यं यथा—"सर्व्वज्ञता तृप्तिरनादि-बोधः स्वतन्त्रता नित्यमलुप्तशक्तिः। अनन्तशक्तिश्च विभोर्विधिज्ञा आहुः षडङ्गानि महेश्वरस्य"। एतेन ब्रह्मणः स्वप्रकाशबोधात्मकता-वादो निरस्तः। कर्त्तृकृदन्तज्ञेतिश्रवणात् सर्व्वपदश्रवणाच्च। तत्-प्रमापयति उपनिषद्वाक्यान्तरमपि "यः सर्व्वज्ञः सर्व्वविदि"त्यादि। एवमद्वैतवादिमते ब्रह्मण्यभेदतात्पर्य्यकं नित्यं विज्ञानमानन्दमिति वाक्यं कथमपि न हि सम्भवति, निराकाङ्क्षत्वात्, यतस्तन्मते ब्रह्म-पदार्थो बोधानन्दः, तादृशबोधानन्दे बोधानन्दपदार्थस्य घटो घटो घटः कलसो वा इति वाक्यस्य घटे घटाभेदान्वयनिराकाङ्क्षत्वमिव निराकाङ्क्षत्वमेव। न च ब्रह्मपदेन ब्रह्मपदवाच्ये लक्षणां स्वीकृत्य तद्वाक्यस्य साकाङ्क्षता उपपादनीया इति वाच्यं लक्षणास्वीकारस्य निर्व्वीजत्वात्। अस्माकन्तु जगत्कर्त्तृत्वविशिष्टात्मत्वावच्छिन्नस्य ब्रह्मपदार्थतया तदवच्छिन्ने ज्ञानाश्रयत्वानन्दजनकत्वयोर्लक्षणां विनापि अन्वये न हि किमपि बाधकमस्ति। अत्र प्रमाणं—अथातो "ब्रह्मजिज्ञासा"—"जन्माद्यस्य यतः" इति च ब्रह्मसूत्रम् "यतो वा इमानि भूतानि जायन्ते" इत्युपनिषद्वाक्यमपि। एतत्-प्रमाणानि अद्वैतवादखण्डनग्रन्थे बहूनि दर्शितानि॥

आनन्दमिति बहुव्रीहिः, विग्रहस्तु—आसम्यक् नन्दः अर्थात् सुखं यस्मात्। अथवा—आनन्दयतीत्यर्थकक्रदन्तं, अद्वैतवादिनस्तु आनन्दं विज्ञानञ्च भावक्रदन्तं नित्यमिति प्रथमान्तं तद्वयमेव साकाङ्क्षमित्याहुः। तदत्यन्तासङ्गतम्, आनन्दपदस्य पुंलिङ्गत्वापत्तेः। विज्ञानमित्यत्र विशब्दस्य व्यर्थतापत्तेः, ज्ञानमिति प्रयोगेणैव सामञ्जस्यसम्भवात्। भावप्रत्ययान्तविज्ञानपदेन ब्रह्मणः शिल्पशास्त्रज्ञानात्मकत्वापत्तेः, तस्यैव कोषावधारितत्वात्, कोषस्तु—"विज्ञानं शिल्पशास्त्रयो"रिति। नित्यपदस्य आनन्दान्वयसाकाङ्क्षत्वमुत्सर्गतो न हि सम्भवति। चकाराद्यसत्त्वे एकत्रविशेषणतयान्वयतात्पर्य्येन प्रयुक्तपदस्याऽपरत्रान्वये निराकाङ्क्षताया औत्सर्गिकत्वात्। नित्यानन्दकल्पने सत्यक्लृप्तकल्पनापत्तिरूपदोषस्य वज्रलेपत्वात्। तस्मात् आनन्दयतीत्युपनिषद्वाक्येन "अधर्म्माज्जायते दुःखं धर्म्मात् सञ्जायते सुख"मित्यादिवाक्येन च समभिकवाक्यताया एव युक्तत्वेनाऽनन्दस्य नित्यताया अप्रामाणिकत्वात्। अतएव मीमांसाकारिका—"सम्भवत्येकवाक्यत्वे वाक्यभेदो न चेष्यते।" आनन्दरूपाणां स्वतःप्रयोजनानाम् उपदेशवाक्यतात्पर्य्यावधारणत्तमव्यक्तिगतानामेव श्रेष्ठत्वं न तु भुजङ्गप्रभृतिभीषणजन्तुगतानां कीटपतङ्गादिगतानाञ्च। तैत्तिरीयोपनिषद्वाक्येन इत्येव प्रतिपादनात्। अनिन्दितकर्म्माचरणजन्य एव आनन्दः प्रशस्त इत्येव ब्रह्माभेदारोपदृष्ट्या तद्वाक्यतोऽवधार्य्यते। अतस्तत्तद्वाक्यानां प्रशंसार्थवादत्वमेव नतु पारमार्थिकब्रह्माभेदबोधकत्वं तत्तद्वाक्यस्य तथा सति तत्तद्वाक्येषु जीवेषु मध्ये कतिपयव्यक्तिमात्रोल्लेखो न स्यात्, परन्तु सर्व्वेषामानन्दो ब्रह्मैवेत्येव तिष्ठेत्। एवं सर्व्वेषां ब्रह्मस्वरूपताया भगवदभिप्रेतत्वे दुःखहिंसाद्वेषादिकं ब्रह्म इत्येकमपि वाक्यं कस्यामप्युपनिषदि कथं न दृश्यते, दृश्यते च स "एको मनुष्यगन्धर्व्वाणामानन्दः, स एको देवगन्धर्व्वाणामानन्दः, स एकः पितॄणां चिरलोकलोकाना-

मावन्दः" इति। एवमन्नपयःप्रभृत्यनिन्दितप्रयोजनद्रव्याणां प्रशंसार्थवादात्मकान्यपि ब्रह्मपदघटितबहुवाक्यानि सन्ति, तान्यपि न पारमार्थिकब्रह्माभेदबोधकानि। तथा सति कस्याञ्चिदुपनिषदि चौरो ब्रह्म दुःखं ब्रह्म विद्वेषो ब्रह्म इत्यादिकवाक्यमपि तिष्ठेत्।

सदेव सौम्येदमग्र आसीत्। एकमेवाद्वितीयमिति छान्दोग्योपनिषद्वाक्यस्य सृष्टेरग्रे प्रत्यक्षविशिष्टमेकमेव तत्कालीना या कृतिः प्रत्यक्षञ्च तद्विशिष्टमपरं किमपि नासीदिति निष्कर्षः खण्डनग्रन्थे दर्शितः। इत्येव सुस्पष्टमाहैतरेयोपनिषद्वाक्यं तद्यथा—"आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चनमिषत् स ईक्षत लोकान् नु सृजा" इति। मिषत् प्रत्यक्षवत्। मिषद्व्यापारवदिति शङ्कराचार्य्यव्याख्या। अतएव मिषदितिप्रयोगः सुष्ठुसङ्गतः, अन्यथा ब्रह्मणः सामान्यतो द्वितीयराहित्यस्य श्रुतितात्पर्य्यविषयत्वे मिषदित्यंशप्रयुज्य नान्यत् किञ्चन इत्येव प्रयुक्तिःतिष्ठेत्। इदमेक इति पञ्चमो तत्पुरुषविग्रहस्तु एभ्योऽर्थात् जगद्भ्य एकोऽर्थात् श्रेष्ठः अथवा भिन्नः, गुरूत्तम इत्यस्य गुरुभ्यः कपिलकमलासनादिभ्य उत्तम इति दीधितिकारदर्शिततत्पुरुषविग्रहवत्। उत्तमशब्दवच्च सुखार्थैकशब्दोऽपि भयादिगणान्तर्गतः कल्पनीयः। नचेदमित्यसमस्तं तत्रेदमेकपदञ्चात्मन्यभेदेन विशेषणतात्पर्य्यकमित्यद्वैतवादिनां व्याख्या समीचीनेति वाच्यम्, तथा सति तत्र सर्व्वनामेदंपदस्य नियमतः पुंलिङ्गत्वावश्यकत्वेन अयमित्येवप्रयोगापत्तेः, यतः सर्व्वनाम तदेतदिदम्शब्दाः श्रौता अप्यभेदान्वयसाकाङ्क्षाः तदर्थान्विताथकलिङ्गत्वमेव भजन्ते। अतएव ऐतदात्म्यमिदं सर्व्वं तत् सत्यं स आत्मा इति च्छान्दोग्योपनिषद्वाक्ये पुंलिङ्गपदेनाऽभिहितस्य प्रक्रान्तस्य बोधकं, "महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः। इत्यंशस्थिततत्पदं स्त्रीलिङ्गमेव दृश्यते। एतेन तत्त्वमसि श्वेतकेतविति वाक्यस्थितं तत्पदं

प्रक्रान्तब्रह्मबोधकं सर्व्वनामेत्यद्वैतवादिव्याख्यानमसमीचीनमेव तथा सति स त्वमसीत्येवप्रयोगापत्तेः। एवं तत्त्वमसीति" वाक्यस्य पदार्थ-निर्व्वचनपरत्वे तत्सर्व्वजीवइत्येवप्रयोगः स्यात्। तत्त्वमसीत्यस्य व्याख्यानमद्वैतवादखण्डने तत्परिशिष्टे च विशदरूपेण दर्शितम्।

'आत्मा ज्ञातव्यो' न स पुनरावर्त्तते' आत्मा वाऽरे श्रोतव्यो मन्तव्यः' 'स्वात्मानञ्चेद्विदानीयादहमस्मीतिपूरुषः। किमिच्छन् कस्य कामाय संसार मनुसंस्मरेत्॥" इत्यादि वहुवाक्येष्वेवात्मपदं श्रूयते। आत्मपदार्थज्ञानं विना तत्तत्पदार्थबोधः कथमपि न हि सम्भवेत्। आत्मपदार्थज्ञानन्तु आत्मत्वज्ञानमपेक्षते, अत आत्मत्वज्ञानार्थमुपाय-श्चिन्तनीयः। स उपायोऽनुमानमन्तरेण न कोऽपि भवितुमर्हति। एवञ्चानुमानमवश्यमनुसन्धातव्यम्, अनुमानप्रकारस्तु—घटपटादिकं कर्त्तृनिष्ठकिञ्चिद्धर्म्मावच्छिन्नकारणतानिरूपितकार्य्यतावत् जन्यत्वात्, अस्मत्कृतिजन्यद्रव्यवत्। कारणतावच्छेदकसम्बन्धःस्वनिष्ठकृतिनिरू-पितोपादानत्वाख्यविषयतारूपः, कार्य्यतावच्छेदकसम्बन्धः समवायः। अथवा कारणतावच्छेदकसम्बन्धः स्वनिष्ठकृतिसाध्यताख्यविषयत्वं कार्य्यतावच्छेदकसम्बन्धस्तादात्म्यम्; तादात्म्येन कार्य्यतास्थले कार्य्य-कारणपारिपाट्यं मथुरानाथप्रणीतपक्षताविचारे द्रष्टव्यम्। जातौ तादृशकारणतावच्छेदकत्वे लाघवमितिज्ञानसहकारेण निरुक्तरीत्या सामान्यतः परामर्शेन तादृशकारणताया अनतिप्रसक्तजातिः सिध्यति, तदन्यूनानतिप्रसक्तधर्म्मस्यैव तदवच्छेदकत्वनियमात्। स च धर्म्मः कृतिमदन्यावृत्तिसकलकृतिमद्वृत्तिजातिरेव, तदेवात्मत्वमिति सर्व्वैरेव व्युत्पन्नैर्गीयते। एवञ्च तादृशजात्यवच्छिन्नेष्वेवात्मपदस्य लाघवेन शक्तिर्युज्यते। एवमनुमाय जीवकृत्यसाध्यानि प्रागभाव-प्रतियोगीनि सर्व्वाख्यात्मवन्ति जन्यत्वात्। जीवात्मकृतिसाध्यनिखिल-जन्यवत्। अत्रात्मनो विधेयत्वं स्वनिष्ठात्मत्वजात्यवच्छिन्नकार-णतानिरूपितकार्य्यतासम्बन्धेन। इत्यनुमानेन य आत्मा सिध्यति

स एव परमात्मा। ईदृशानुमानविषयतया जीवात्मपर्य्यवसानं न हि सम्भवेत्, पक्षे तद्बाधात् लाघवेन सामान्यतो जन्यत्वावच्छिन्नं प्रति आत्मत्वेन हेतुत्वौचित्याच्च—न च जन्यत्वे आत्मजन्यतावच्छेदकत्वमप्रकल्प्य साध्यत्वाख्यविषयतावत्त्व एव आत्मजन्यतावच्छेदकत्वं स्वीकर्त्तुमुचितं तस्या जन्यत्वापेक्षया अति लाघवादेवञ्चास्मदादिकृत्यसाध्ये कृतिसाध्यताया अस्वीकारेण दर्शितानुमानेन कथं जीवभिन्न आत्मा सिद्धेरदिति वाच्यं निरुक्तसाध्यत्वस्य जन्यतावच्छेदकत्वेऽपि जीवभिन्नव्यक्तेः कृतिसाध्यताया द्व्यणुकधराधरधरावारिधितरुलताप्रभृतिषूपनिषद्ब्रह्मसूत्रप्रभृति-बहुप्रमाणप्रतिपादितत्वात्। प्रमाणं यथा—"यतो वा इमानि भूतानि जायन्ते" 'जन्माद्यस्य यतः' "कर्त्ता कारयिता शम्भु"रित्यादि। न च परमवाक्यबलेन परमेश्वरे कर्त्तृत्वावधारणात् दर्शितानुमानं सिद्धसाधनं अनतिप्रयोजनकञ्चेति वाच्यं लाघवादिकेन लघुधर्म्मेणैव जीवात्मपरमात्मसाधारणकारणतासाधनार्थं दर्शितानुमानस्यावश्यकत्वात्। एतेन आत्मत्वजातिमस्वीकृत्य गुरोरपि ज्ञानस्यात्मपदप्रवृत्तिनिमित्तत्वं गदाधरेण स्वीकृतम् तदपि निरस्तम्। ज्ञानेच्छाकृतीनां जीवात्मपरमात्मसाधारणानां विनिगमनाविरहेण ज्ञानत्वादिप्रत्येकरूपेण प्रवृत्तिनिमित्तत्वापत्तेश्च, कॢप्तात्मत्वजातौ स्वरूपतः प्रवृत्तिनिमित्तत्वसम्भवेन ज्ञानत्वादिरूपधर्म्मावच्छिन्नेषु प्रवृत्तिनिमित्तत्वानां कल्पनस्यापसिद्धान्तकवलितत्वाच्च। न च जनकतावच्छेदकतया जातिसिद्धिर्भवेदिति न दृश्यते इति वाच्यं गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्वरूपाया विभागादिकारणतावच्छेदकतया द्रव्यत्वरूपायाश्च जातेः सिद्धत्वस्य सर्व्वसम्मतत्वात्। एवं सुखदुःखादिजनकतया पुण्यत्वपापत्वयोः स्मृतिकारणतावच्छेदकतया भावनात्वस्य च जातित्वसिद्धिर्द्रष्टव्या।

अथ दर्शितकारणतावच्छेदकतया जातिविशेषे सिद्धेऽपि तद्वि-

शिष्टेष्वात्मपदस्य शक्तिर्ज्ञातुं न शक्यते, तदवधायकस्य व्याकरणोपमानकोषाप्तवाक्यलौकिकव्यवहारादिरूपस्य कस्याप्यसत्त्वात् इति चेन्न यतः "शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः" इति प्राचीनव्यवस्थापितशक्तिग्राहकान्यतमोपायानां मध्ये सिद्धपदसान्निध्यरूपोपायादेव तादृशजात्यवच्छिन्नेष्वात्मपदशक्तिग्रहः सम्भवति। आत्मनः स्युश्चतुर्दशेत्यन्तमहर्षिप्रणीतवाक्यमध्ये आत्मान्वितकृतिबोधकपदसान्निध्यात् कृतिमन्निष्ठजनकतावच्छेदकतया जातिविशेषस्य दर्शितानुमानेन साधितत्वाच्च।

अथ ब्रह्मपदशक्तिनिरूपणम्।

'ब्रह्मन्' पदं महत्त्वरूपपरिमाणवाचिवृंहधातुकर्त्तृविहितमन्प्रत्ययनिष्पन्नम्। एवञ्च 'ब्रह्मन्' पदस्य योगलभ्यार्थो महत्त्वरूपपरिमाणगुणाश्रयः, रूढ्या च आत्मत्वरूपजात्याश्रयः, महत्त्वाश्रयत्वे सति आत्मत्वरूपजातिमदित्येव फलितम्। एतावता पङ्कजादिवद् 'ब्रह्मन्' पदं योगरूढमेवेति सर्व्वैरेवावधार्य्यताम्। "ब्रह्मसूत्र" भाष्यव्याख्यातृषड्दर्शनटीकाकृद्वाचस्पतिमिश्रप्रणीत "भामती" स्थितवाक्यतस्तत्पदस्य योगरूढत्वमेवावगतम्। वाक्यं यथा,—"वृहत्वाद् वृंहणत्वाच्चात्मेति ब्रह्म"। योगार्थताबोधदार्थ्यार्थं वृहत्वाद् वृंहणत्वाच्चेति पुनरुक्तिः सुष्ठु सङ्गता। एवं रीत्यैव "जपात् सिद्धिर्जपात् सिद्धिर्जपात् सिद्धि र्न संशयः", "एकमेवाद्वितीयम्", "सत्यं सत्यं न संशयः" इत्यादिवाक्यान्यपि सङ्गमनीयानि। एवञ्च निखिलजीवेषु भगवति च ब्रह्मपदवाच्यत्वमकामेनापि सर्व्वैरेव स्वीकर्त्तव्यम्। अतएव भगवद्बोधतात्पर्य्येण 'परमब्रह्म' 'परमात्म'पदप्रयोगो नासङ्गतः। ब्रह्मपदार्थस्यात्मपदार्थानाञ्च बहुविधत्वासत्त्वे इतरव्यावृत्तये परमशब्दप्रयोगस्यात्यन्तासङ्गतत्वापत्तिः। न हि कोऽपि प्रयुङ्क्ते

'परमकृष्णः' 'परमवलराम' इत्यादिकम्। ब्रह्मणो द्वैविध्ये कुसुमाञ्जलिव्याख्याकृद्वरिदासरामभद्रप्रदर्शितप्रमाणमपि—"द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव च।" एतेन बृहत्त्वरूपपरिमाणस्यानन्दे बोधे च बाधितत्वेन तत्र ब्रह्मपदार्थतावादो निरस्तः। बोधे ब्रह्मपदार्थतायाः सुस्पष्टप्रतिपादकवाक्यासत्त्वाच्च।

इदमत्रावधेयम्,—गुणी गुणवान् सगुणो निर्गुणो मनस्वी सहृदय इत्यादिवाक्याद् यथा प्रशस्तगुणप्रशस्तहृदयादिबोध औत्सर्गिकस्तथा जीवबोधकपदविशेषरहितकेवलब्रह्मपदं यद् यद् वाक्येषु तिष्ठति तत्तद्वाक्यघटकब्रह्मपदं सङ्कोचेन लक्षणया वा परमब्रह्मबोधकमेव। अतएव ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत" इतिवाक्यस्थित 'ओं तत्सदितिपदानां परमब्रह्मण एव नामत्वोपपत्तिर्न तु जीवब्रह्मणोऽपि। एवं रीत्यैव "सत्यं ज्ञानमनन्तं ब्रह्म"-त्यादिवाक्यमप्युपपादनीयम्।

छान्दोग्योपनिषत्स्थितः "सदेव सौम्येत्यादिकियदंशो व्याख्यात एव। तदपरभागस्तु—"येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु स आदेशो भवतीति। यथैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य"मित्यादिदृष्टान्तवाक्योत्तरमेवं सौम्य स आदेशो भवतीति दार्ष्टान्तवाक्यम्। दृष्टान्तवाक्यदार्ष्टान्तवाक्ययोर्भावार्थस्तु येनाश्रुतं श्रुतं भवतीत्यंशेन एकज्ञानेन बहुज्ञानं जायत इत्युपदेशः। एकज्ञानेन बहुज्ञानं नासम्भवि। दृष्टान्तेन दृढ़ीकरणाय यथैकेनेत्यादिकम्। सर्वं मृन्मयं विज्ञातं स्यादित्यंश एव निरुक्तासम्भवशङ्कानिवर्त्तकः। वाचारम्भणमित्यादिकं मृत्पिण्डमात्रस्यावस्थाविवरणपरं न तु दार्ष्टान्ते ब्रह्मोपादानकत्वब्रह्मविकारत्वसाधनाय उक्तं बाधितार्थकत्वात्। यतश्छान्दोग्योपनिषद्वाक्येन "भूमिरापोऽनलो वायु"रित्यंशेन प्रकृतिमभिधाय "मयाध्यक्षेण प्रकृतिः

सूयते सचराचर"मित्याद्युक्तवता भगवता च परमाणूपादानकत्वरूप-विकारत्वमुक्तम्। छान्दोग्योपनिषद्वाक्यं यथा—"स य एषोऽणिमा। ऐतदात्म्यमिदं सर्व्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इति। अत्रैतदात्म्यपदमव्यवहितोक्ताणूपादानकत्वस्य परमात्मकर्त्तृकत्वस्य च बोधकम्। "शब्दशक्तिप्रकाशिकायां" 'विदिभिदिच्छिदेः कुरचिति' सूत्रे सहितपदलोपकर्म्मधारयो जगदीशेन प्रदर्शितः। तद्वत् "ऐत-दात्म्य"पदस्यारितैतदात्मन्पदमपि सहितपदलोपकर्म्मधारय एव। अतो न तदेकतरपदस्य वैयर्थ्यं स आत्मेतिपदस्य वा। एतद्विचार-विस्तारो"ऽद्वैतवादखण्डन"ग्रन्थे द्रष्टव्यः।

भगवद्गीतास्थितेन "प्रकृतिं यान्ति मामिका"मित्यंशेन भूम्यादिरूपपरमाणौ लयप्रतिपादकेन जन्यद्रव्याणामुपादानत्वं सूचितं, यत्र यस्य लयस्तदेव तस्योपादानमितिनियमात्। अन्यथा मामिकां प्रकृतिमित्यनुक्त्वा मामित्येव ब्रूयात्।

सर्व्वैरेवावधार्य्यतां परमाणुष्वेव चरमद्रव्यध्वंसानां शास्त्रतः सुव्यक्तप्रतिपन्नत्वेन तादृशध्वंसेषूपादानतायाः व्यापकत्वनियमेन च पूर्व्वप्रदर्शितपरमवाक्यनिकर-ब्रह्मसूत्राभ्यान्तु परमाणुष्वेव द्रव्यो-पादानत्वस्य सुस्पष्टं प्रतिपादितत्वेन च जन्यद्रव्येषु ब्रह्माभेदव्यवस्था कथमपि न सम्भवति, तस्य तदनुपादानत्वात्। इत्थञ्च निखिलोप-निषत्सु यावन्तोऽर्थवादा ब्रह्माभेदबोधकाः सन्ति तादृशवाक्य-सहस्रमपि यथासम्भवं विवेकाद्युपयोगिभावनापरतया वस्तुविशेषाणां स्तुत्यादिपरतया च व्याख्यातव्यम्। सर्व्वस्मिन्नर्थवादे प्रमात्मकशाब्द-जनकत्वमिति न नियमः। अतएव "नार्थवादोऽयमुदितः स्तुति-वादो न वै मुने। सत्यं यथार्थवादोऽयं श्रद्धेयः सद्भिरादरात्॥" इति स्कन्दपुराणवचनम्। एतद्वचनेन सकलप्रमाणापेक्षयार्थ-वादानां दुर्ब्बलत्वं सूचितम्। परन्तु य एवार्थवादाश्चिरपरम्परा-प्रचलितशिष्टव्यवहारविषयाणां शास्त्रेण युक्त्या वावधारितानाञ्चा-

विरुद्धार्थप्रतिपादका न भवेयुस्तान्येव वाक्यानि प्रमात्मकबोधं प्रसवितुं प्रभवन्ति। इति जैमिनिगौतमकणादप्रभृतिमहर्षिमतानुसारिणां शास्त्रमीमांसा।

एतेन जगत्कर्त्तृत्वेन एकस्य परमात्मनो ज्ञानजन्यं परमशुभं लब्धा हे श्वेतकेतो त्वं भगवत्तुल्याचारवान् भवेः, विध्यर्थे लट् प्रत्ययः। अतएवासीत्यंशस्य न वैयर्थ्यम्। "अद्वैतवादखण्डनपरिशिष्टे"ऽप्येतद्विचारविस्तृतिर्द्रष्टव्या। न तु जगदुपादानकत्वेनापि भगवच्चिन्तनं तत्र तस्य बाधितत्वादितिज्ञापनाय परमाणुष्वेव जगदुपादानकत्वप्रदर्शनसार्थक्यं जगत्कर्त्तृत्वेन भगवदुपासनामुपनिषदन्तरमपि सुस्पष्टं प्रमापयति। यथा—"तज्जलान् इति शान्त उपासीत"। तज्जलानित्यस्य भावार्थः—तस्य सर्व्वस्य 'जः' जननं 'लः' लयः 'अन्' रक्षा यस्मात्, छान्दसत्वान्नकारलोपाभावः। न हि दृष्टान्तवाक्येन यो योऽर्थः प्रतिपाद्यते तत्सर्व्व एव दार्ष्टान्ते सिध्यतीति नियमः, परन्तु तत्राबाधितार्थ एव। अतएव—

"पाण्डुपुत्रो यथा भीमो भीमः कर्णस्तथाहवे।
तयोः सम्मुखयुद्धेऽद्य न जाने किं भविष्यति॥"

इति वाक्यतो न कर्णे पाण्डुपुत्रत्वसिद्धिः। एवंविधानि बहुदृष्टान्तवाक्यानि सन्ति, ग्रन्थगौरवभयेन न दर्श्यन्ते। एवञ्च दर्शितच्छान्दोग्योपनिषद्वाक्येषु उपक्रमोपसंहारयोरैक्यमेव नास्तीत्यद्वैतवादिनां तत्रोपक्रमोपसंहारैक्यानुसन्धानं किं न वायसदन्तानुसन्धानसमानम्। इदमपि रहस्य-मद्वैतवादिना-मनवरतमुपक्रमोपसंहारैक्यचीत्कारः श्रूयते, ते हि जानन्तु, यत्र यथार्थसन्देहो जायते तत्रैवोपक्रमोपसंहारैक्यानुसन्धानमर्थनिश्चायकम्। यादृशवाक्यार्थे संशयलेशोऽपि नास्ति, तत्र तदैक्यं न किमपि फलमर्ज्जयितुं प्रभवेत्। इत्यास्ताम्।

"येनाश्रुतं श्रुतं भवत्यमत—" मित्यादिच्छान्दोग्योपनिषद्वाक्येन

जगत्कर्त्तृत्वादिना एकस्य परमेश्वरस्य ज्ञानेन जगति यावन्तः पदार्था अर्थात् परमाणुपयोनिधिपर्व्वतपवनपापपुण्यभ्रमनिदानाविद्यापरजीवप्रभृतयः सर्व्वं एव विज्ञायन्ते, तद्वाक्यस्थितत्वतीयाजन्यत्वार्थिका। अयं भावः—उक्तरूपेण परमेश्वरं ज्ञात्वा योगरूपपरमधर्म्मं लभते यद्बलाद् योगी भूत्वा सर्व्वज्ञो भवेत्, साकारत्वजगत्कर्त्तृत्वादिरूपपरमेश्वरगतसकलधर्म्मभगवन्तं साक्षात्कृत्य देहान्ते मुक्तिं लभते च। ईदृशेश्वरतत्त्वज्ञानस्य निरुक्तयोगजनकत्वे प्रमाणं—

"श्रवणेनानुमानेन ध्यानाभ्यासरसेन च।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्॥"

तादृशयोगबलात् परमेश्वरसाक्षात्कारे प्रमाणन्तु—

"योगिनस्तं प्रपश्यन्ति भगवन्तमधोक्षजम्।" इति।

तादृशसाक्षात्कारे साक्षात्कारोत्तरकैवल्यजनने च प्रमाणञ्च—"न वारे मैत्रेयि पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय, आत्मा वारे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः पश्चात् साक्षात्कर्त्तव्यः एतावतारे खल्वमृतम्।"

एकज्ञानेन बहुज्ञानं जायते इति न दृष्टचरमित्याशङ्कानिवृत्तये दृष्टान्तेन द्रढ़यति—

"यथैकेन मृत्पिण्डेन सर्व्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। यथैकेन नखनिकृन्तनेन सर्व्वं लौहमयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं लौहमित्येव सत्य"मित्यादि। नखनिकृन्तनं नखभागविच्छेदकः क्षुद्रशस्त्रविशेषः।

अथ मृदाद्यभेदरूपविकारत्वस्यापि दृष्टान्तवाक्यादवगमेन सर्व्वस्मिन् वस्तुनि ब्रह्माभेद एवावधार्य्यते इति चेन्न, एकनखनिकृन्तनाभेदरूपविकारत्वस्य सकललौहमयेष्वत्यन्तबाधेन तद्दृष्टान्तेन जगति ब्रह्माभेदनिषेधस्यैव प्रतिपादनात्। परन्तु एकस्य

ज्ञानेन बहुज्ञानं जायते इत्येव तादृशदृष्टान्तवाक्येन प्रतिपादितम्। तत्तद्वाक्यस्थितविकारादिपदन्तु सामान्यतो लौहादेरेवावस्थावर्णन-परम्। अतएव कामिनीमुखं नवीनानां सर्व्वेषामानन्दकरं यथा प्रफुल्लपङ्कजम्, पङ्कजन्तु जलजकुसुममित्यादिप्रयोगोऽपि सुष्ठु सङ्गतः। किमीदृशदृष्टान्तेन कामिनीमुखे पङ्कजकुसुमत्वं सिध्येत्। एवञ्चा-द्वैतवादिनः किं दृष्टान्तबलमवलम्ब्य जगति ब्रह्माभेदं साधयितुं साहसिनो भवन्ति इति विज्ञातुं न प्रभवामः। अथ दृष्टान्तेन सर्व्वत्र ब्रह्माभेदसिद्धिर्मास्तु परन्तु "सर्व्वं खल्विदं ब्रह्मे"ति साक्षात् श्रुतिरेव तेषु तस्याभेदं साधयेदिति चेन्न तादृशश्रुतिस्थसर्व्वपदस्य "आयुर्घृतम्" "पिता स्वर्गः पिता धर्म्म" इत्याद्यसंख्यवाक्यस्थितायुः-पदस्वर्गपदादेरिव जनकलाक्षणिकत्वम्, तद्विना कथमप्युपपत्त्य-सम्भवात्। यतः "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वे"ति ब्रह्म-सूत्राभ्या"मशब्दमस्पर्शमरूपमव्यय"मित्यादिप्राक्प्रदर्शितश्रुत्या च निखिलभूतेषु ब्रह्मभेद एव सुस्पष्टं प्रतिपादितः।

केचित्तु सर्व्वमित्यादिवाक्यं भ्रमात्मकाभेदभावनायामेव तात्पर्य्यं न तु प्रमात्मिकायामपि, उक्तसूत्रादिविरोधात्। तादृशभावनादि-पुत्रकलत्रशत्रुत्वादिनिबन्धनबुद्धिवैषम्यनिवृत्तावुपयुज्यते। अतएव गीतावाक्यम्,—"समः सर्व्वेषु भूतेषु मद्भक्तिं लभते पराम्।" "भक्त्या मामभिजानाती"त्यादि। एतद्विचारविस्तारः खण्डनग्रन्थे द्रष्टव्यः। इति प्राहुः।

अद्वैते तिमिरावृते कतिपयप्राणि-प्रयत्नः पुन
स्तच्छास्त्रस्य विलोकनाय विदुषामालोकसंलेपने।
आलोको ननु नैष किं कमलिनीकान्ते कदास्तं गते
यात्यस्ताचलगह्वरे शशधरे खद्योतविद्योतनम्॥

शुकवदुच्चारणपटवस्तु अद्वैतप्रतिपादकोपनिषल्लेशमप्यनवलोक्य एकं द्विकं मुनिवचनं चिरमनुसन्धाय प्रकाशयतिस्म। तद्वचनन्तु—

"ज्ञानं नैवात्मनो धर्म्मो न गुणो वा कथञ्चन।
ज्ञानस्वरूप एवात्मा नित्योऽव्यक्तः सनातनः॥
वदन्ति तत् तत्त्वविदस्तत्त्वं तज्ज्ञानमव्ययम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥"

इत्याहुः। इदमेकान्तहास्यास्पदमेव। यत उक्तवचने बहु-पुनरुक्तिदोषसत्त्वेन तस्य ऋषियुक्तत्वे सन्देहः, परन्तु कस्यचिदद्वैत-वादिनः कारिका। अस्तु वा तत् ऋषिवाक्यं, तावतापि किमनि-ष्टम्? गौतमः कणादश्च किं न महर्षी, यत् तद्वयमश्रद्धेयम्? वयन्तु जानीमहे, गौतमः परमतपस्वी सकलश्रुतिवाक्यार्थस्य प्रकृततत्त्व-मपरसकलमहर्ष्यपेक्षया शङ्कराचार्य्याद्यपेक्षया च विज्ञातुं प्रभु-रासीत्, सकलजीवापेक्षया सूक्ष्मधीसम्पन्नत्वात्। अतोऽपरमुनि-शतमपि तदपेक्षया दुर्ब्बलमेव। एवञ्च तपःप्रभावेणाहल्यायां पाषा-णत्व विदधतः सूत्रप्रणेतुर्महामुनेर्गौतमस्य मताविरोधिनापर-सकल-मुनिवाक्यतात्पर्य्यावधारणे यतितव्यम्, सूत्रस्य सर्व्वतो बलवत्त्वात्। अतएव सूत्रविरुद्धमपरमहर्षिवाक्यशतमपि प्रशंसाद्यर्थवादतयैवोप-पादनीयम्। सूत्राप्राप्तवाक्यार्थयोर्व्विरोधसन्देहे तु सत्तर्कानुमानेन तच्छङ्का परिहरणीया। अत्र ऋषिवाक्यम्,—"यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः"। "मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं पराम्॥" इति न्यायविदां सिद्धान्तः। एवञ्च "ज्ञानं नैवात्मनो धर्म्म—" इत्यादिवचनं ज्ञानप्रशंसार्थवाद एव; अतएव तद्वाक्ये "सनातनो" "नित्य" इति पुनरुक्तिर्न खलु दोषाय।

परे तु "ज्ञानं नैवात्मनो धर्म्म—" इत्याद्युक्तवचनं ब्रह्मप्रतिपादक-मेव। तद्वचनभावार्थस्तु, ज्ञानपदार्थो द्विविधः, तत्रैकजातीयं सकल-व्याकरण-सकल-कोष-सर्व्वजनव्यवहारतो गुणविशेषत्वेनाव-धारितम्। तादृशज्ञानरूपगुणस्तु, नित्यः, अनित्यश्च। "यः सर्व्वज्ञः सर्व्वविदितिश्रुतिप्राप्तभगवज्ज्ञानं नित्यम्, अन्यानि यावज्ज्ञानानि

अनित्यानि। अत्र प्रमाणं, “श्रवणेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां—” इत्यादि ‘प्रकल्पयन्’ जनयन्। “बुद्धि-नाशात् प्रणश्यति” इति भगवद्वाक्यमपि। अपरञ्च ज्ञानपदार्थं उक्त वाक्यतो ज्ञानपदार्थे गुणभिन्नत्वावगमेन द्रव्यविशेष इत्यवधार्य्यते। अतो हर्य्यादिपदवत् ज्ञानपदमननुगतनानाशक्ति-मत्। तत्रैका शक्तिर्गुणत्वव्याप्यज्ञानत्वावच्छिन्ना। अपरा तु द्रव्यत्वव्याप्यधर्म्मावच्छिन्ना। दृश्यते च पित्रादिसङ्केतितज्ञानादि-रूपं निखिलमेव पदं द्रव्यत्वव्याप्यजात्यवच्छिन्नवृत्तिमत्। ब्रह्मबोधकं ज्ञानबोधानन्दादिपदं न गुणविशेषबोधकं ब्रह्मण आत्मन्यवृत्तित्वात्; इत्येवाह—“ज्ञानं नैवात्मनो धर्म्मो न गुणो वा कथञ्चन।” ब्रह्मणो गुणस्वरूपत्वे आत्मवृत्तित्वापत्तेः। यतो गुणमात्रस्य किञ्चित्सम-वेतत्वनियमः। ज्ञानपदप्रतिपाद्यद्रव्यविशेष आत्मा नित्य इत्याह “ज्ञानस्वरूप एवात्मा नित्योऽव्यक्तः सनातनः।” एतेन ब्रह्मणि आत्मावृत्तित्वं सूचितम्।—यावन्नित्यद्रव्याणामेवासमवेतत्वनियमात्।

न चैवं वचने ‘आत्मन’ इति व्यर्थं ‘न धर्म्म’ इत्यनेनैव साम-ञ्जस्यादिति वाच्यम्, ‘सनातन’ इत्यंशेन तस्य सर्व्वकालवृत्तित्वप्रति-पादिततया सामान्यतो धर्म्मत्वाभावस्य तत्र बाधितत्वात्। “दृष्ट-स्वभार्य्य” इतिवत् गङ्गेशोपाध्यायोक्त“स्वसमानाधिकरणभेदा-प्रतियोगियद्वत्कत्व”मितिवच्च उक्तवाक्यस्य ज्ञानस्वरूप’ इत्यंशो बहु-व्रीहिरेव। विग्रहस्तु—ज्ञानं स्वस्य रूपमर्थात् धर्म्मो यस्य इति। एवञ्च उक्तवाक्यस्य—‘न गुण’ इत्यंशलभ्यार्थस्यात्मरूपद्रव्यविशेष-पर्य्यवसायित्वेन “नित्यं विज्ञानमानन्दं ब्रह्मे”त्याद्युपनिषद्वाक्यशतस्य भावकृदन्तत्वेऽपि तार्किकाणां न तत्र विवादलेशोऽपि, तत्रानन्दादि-पदानां दर्शितदिशा शक्त्यन्तरेणैवात्मरूपद्रव्यविशेषबोधकत्वात्। एवञ्च तादृशविशुद्धात्मन्येव “यः सर्व्वज्ञः सर्व्वंवित्” “विश्वस्य कर्त्ता” इत्याद्यसंख्यश्रुतिप्रतिपादितसर्व्वविषयकज्ञानकृतिमत्त्वं निराबाधमेव,

किमुत मायादिरूपैश्वर्य्यावच्छेदेनैव तत्तद्गुणवत्त्वस्वीकारप्रयासः शङ्कराचार्य्यमतानुसारिणाम्। इति।

"ज्ञानस्वरूप एवात्मा—" इति पूर्व्वप्रयुक्तं संवादेन दृढ़यति— "वदन्ति तत्तत्त्वविदस्तत्त्वं तज्ज्ञानमव्ययम्।" अस्य भावार्थः— 'तस्य' ब्रह्मणः तत्त्वं 'तत्तत्त्वं' ब्रह्मासाधारणधर्म्म इति यावत् तद्विज्ञातार इति फलितम्। योगिभिरवधारितस्य ब्रह्मणः कोऽसाधारण धर्म्म इत्याकाङ्क्षायामाह—"तत्त्वं तज्ज्ञानमव्ययम्" इति। अस्य निष्कर्षः—तस्य ब्रह्मणो ज्ञानं तत्त्वं, तद्गतज्ञानन्तु अव्ययं नित्यमिति यावत्। एवञ्च "नित्योऽव्यक्तः सनातन" इत्यंशस्य ब्रह्मणो विशेषणतात्पर्य्यकत्वम्, "अव्यय"-मित्यंशस्य तु ब्रह्मवृत्तिज्ञानविशेषणतात्पर्य्यकत्वम्। अतो न पुनरुक्तिदोषः। अथ वचनस्थित—नित्य-सनातनपदयोरेकतर-वैयर्थ्यमिति चेन्न तत्र सनातनपदस्य नित्यपदस्य च ज्ञाप्यज्ञापकतात्पर्य्येणैव प्रयुक्तत्वात्। एतावता दूरदर्शिनः किमनुभवन्ति, उक्तमृषिवचनं गौतममतसाधकमुत वा ब्रह्मण एव नित्यत्वमङ्गीकृतवद्वैतवादिमतसाधकमिति। ईश्वरस्य च तज्ज्ञानस्य च द्वयोरेव उक्तवचनेन किं नित्यत्वं नायातम्? वस्तुतस्तु उक्तवचनव्याख्यामद्वैतवादिनः कर्त्तुं न प्रभवन्ति।

मायायाः पदार्थान्तरत्वं बहुधा निराकृतम्, तत्स्वीकारोऽनावश्यकश्च। न च "निर्गुणं परमं ब्रह्म"तिवाक्यस्थगुणपदस्य लक्षणया गुणविशेषबोधकत्वकल्पनापेक्षया शक्त्या गुणसामान्यबोधकत्वकल्पनमेव युक्तिपथमारोहतीति वाच्यम्, तत्पदस्य लक्षणाकल्पकयुक्तेः प्राक् प्रदर्शितत्वात्। एवं परमात्मनो द्रव्यरूपतया तत्र संयोगविभागसंख्यापरिमाणादिगुणानामवश्यं स्वीकर्त्तव्यत्वेन गुणसामान्याभावस्य तत्राकाशकुसुमसमत्वात्। अपि च दर्शितवचनास्थितेन "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।" इति वाक्येनापि ब्रह्मपदार्थेन

समं भगवत्पदार्थाभेद एव प्रतिपादितः। भगपदार्थस्तु, इच्छा-ज्ञानैश्वर्य्यादिरूपः। अस्माकन्तु महर्षिवाक्येषु तन्मतेषु भगवद्-वाक्येषु च परमविश्वासः, तदन्यजीवकोटेर्व्वचसि मीमांसायां न विश्वासलेशोऽपि। इत्यास्ताम्।

धन्य एवाद्वैतवादिनामन्धविश्वासः। "सर्व्वं खल्विदं ब्रह्म" "तत्त्वमसि श्वेतकेत"वित्यादिवाक्यानां प्रकृततात्पर्य्यं शङ्कराचार्य्य एव जानाति स्म। तर्काम्बुधिपारगामी महामुनिरक्षपादः कणादश्च तत्तद्वाक्यं न श्रुतवन्तौ उत वा श्रुतस्यापि तत्तद्वाक्यस्य प्रकृत-तात्पर्य्यमवधारयितुं न प्रभवतः स्म। अथ तत्तन्महर्षिजीवनसमये तत्तदुपनिषद्वाक्यप्रचारो नासीदिति चेत् तत्तद्वाक्यानां प्रामाण्यं संस्थापयितुं कथं प्रभविष्यथ। अनादिशिष्टपरम्परापरिगृहीत-वाक्यानामेव प्रामाण्यात् शास्त्रत्वाच्च।

भो भो मायावादपाठकाः, मुद्रितनयनाः सन्तः कियत्कालं चिन्तयत "सर्व्वं खल्विदं ब्रह्म" "तत्त्वमसि श्वेतकेत"वित्यादिश्रुति-वाक्यानि केवलं शङ्कराचार्य्यमतपोषणाय श्रुतिप्रणेत्रा न प्रणीतानि इति।

अथ ब्रह्मपदार्थतावच्छेदकीभूतस्य मायानवच्छिन्नत्वस्य भगवत्-पदार्थतावच्छेदकज्ञानेच्छादिमत्त्वस्य च परस्परं विभिन्नत्वेऽपि धर्म्मैक्येन "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।" इत्यादि-प्रयोगो नासङ्गत इति चेन्न तथा रीत्या तत्सङ्गमने "ब्रह्मेति पर-मात्मेति शूकेति गौरिति शब्द्यते।" इत्यादिवाक्यस्यापि सुसङ्गतत्वा-पत्तेः। यतः खगवादिपशूनामपि मोहावच्छिन्नब्रह्मात्मकतया धर्म्मैक्यं निराबाधमेव। अथ पश्वादौ ब्रह्मभेदसत्त्वेऽपि तार्किकमते तत्तद्बोधे भगवच्छब्दप्रयोगो दुर्व्वार एव, भगपदप्रतिपाद्यज्ञानेच्छयोः पश्वादिष्वपि सत्त्वात् इति चेन्न मतुपः प्रशंसाबोधकत्वेन प्रशस्त-ज्ञानेच्छाबोधकत्वोपगमात्। अतएव महर्षिप्रभृतिमहात्मगण-बोध-

तात्पर्य्येणापि भगवत्पदप्रयोगो दृश्यते, केवलब्रह्मबोधकभगव-च्छब्दोऽप्यस्ति, तत्र भगपदार्थो ज्ञानेच्छासर्व्वैश्वर्य्यादिरूपः। एवञ्च "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।" इति परमवाक्यस्य सुष्ठूपपत्तिरपि। धन्य एवाद्वैतवादिनां धनुर्भङ्गवत् पणः।

न मायावादिनां भ्रान्तिशान्तिः स्यात् श्रुतियुक्तिभिः।
कुष्ठरोगस्तु, किं शाम्येन्महौषधशतैरपि॥

दृष्ट्वानार्षनिबन्धमेव वदसि ब्रह्मास्मिवाणीं सदा
तन्नाराधनमीश्वरस्य यदिदन्त्वासीत् खपुष्पं पुरा।
तस्मात् प्राक्तनसज्जनव्यवहृतिं जानन् जगद्बान्धवे
भक्तिप्रीतिरसाभिषिक्तहृदयः कालं मुदा यापय॥

शिवमस्तु।

इति महामहोपाध्याय श्रीराखालदास न्यायरत्नप्रणीत
मायावादनिरासः।
सम्पूर्णोऽयं ग्रन्थः।

विज्ञापनम् ।

पुस्तकम्	मूल्यम्
१। अद्वैतवादखण्डनम् दीधितिकृन्न्यूनतावादसहितम् [ग्रन्थकर्त्तुः सप्रतिमूर्त्तिसंक्षिप्तजीवनचरितोपेतम्]	२)
२। खण्डनपरिशिष्टम्	।≠)
३। विविधविचारः	१)
४। गदाधरन्यूनतावादः तथा दीधितिकृन्न्यूनतावादः ...	॥)
५। शक्तिवादरहस्यप्रकाशः	।)
६। कवितावली	।)
७। मायावादनिरासः	१)

महामहोपाध्याय श्रीयुक्त राखालदासन्यायरत्न भट्टाचार्य्यमहाशयेन प्रणीतानि पुस्तकान्येतानि निम्नलिखितस्थाने लभ्यन्ते—

श्रीहरिहर भट्टाचार्य्यः

१८५, सोनारपुरा, वेनारस सिटि।

ईऊ० पी०